'oona Oriental Series No. 88

॥ श्री ॥

'श्रीनिवास' विरचिता

म. गान्धी-प्रणीत-राष्ट्रोद्धार-तत्त्वविवेचिनी

गान्धी-गीता

GĀNDHI GĪTĀ

Being the elucidation of Gandhian Philosophy in Sanskrit Verse with Notes & Summary in English

By

S. N. TADPATRIKAR, M. A.

With Foreword in Sanskrit

By

His Excellency Shri M. S. ANEY,

Governor of Bihar, Patna.

And in English

By

Honourable Shri G. V. MAVLANKAR,

Speaker, Indian Dominion Parliament,

Oriental Book Agency

Shukrawar, POONA 2 (India).

ry 1949] [Price Rs. 3-12

Poona Oriental Series

[Almost all works are fully annotated & transd. in English and those unpriced ones are almost in Press]

No.	Title	Rs.	As.
1	भगवद्गीता शांकरभाष्योपेता Best critical text only.		
2	—A Fresh study- प्रो. वाडेकर	1	4
3	केन उपनिषद् सटीकमात्रं- श्रीधरशास्त्री पाठक	1	12
4	कठ ———	2	8
5	मुण्डक ———	1	12
6	ईशावास्य ———	1	4
7	Constructive Survey of Upanisadic Philosophy by Prof- Ranade (Rough paper)	11	4
	—Glazed paper libry-ed)	17	8
8	श्रीशंकराचार्यविरचितप्रकरणग्रंथाः		
9	सांख्यकारिका-डॉ. H. D. शर्मा	5	0
10	—तत्त्वकौमुदी- " & G. झा.	5	0
11	— System, critical study- सोवनी	1	4
12	Ṛgveda-Lectures on-V. S. घाटे. Revised ed. by डॉ. सुखटणकर	3	12
13	ब्रह्मसूत्र II-1-2- डॉ. बेलवलकर	8	0
14	वेदान्तसार-प्रो. हिरिअण्णा	1	12
15	तर्कसंग्रह-दीपिकामात्रं	0	12
16	तर्कभाषा मूलमात्रं-कुलकर्णी	1	4
17	— English Tr.by G. झा.		
18	अर्थसंग्रह-गोखले	2	8
19	न्यायसार-अभ्यंकर & देवधर	2	12
20	सप्तपदार्थी- V. S. घाटे	1	
21	धम्मपद-डॉ. P. L. वैद्य		
22	प्राकृतप्रकाश- "	8	
23	Manual of Pali- C. V. जोशी		
24	Comp-Philology- प्रो. जागिरदार		
25	मुद्राराक्षस- K. H. ध्रुव	4	
26	वेणीसंहार- K. N. द्रविड	0	
27	स्वप्नवासवदत्ता-प्रो. C. R. देवधर	3	
28	प्रतिमा-प्रो. S. M. परांजपे	3	
29	Plays Ascribed to भास (Thesis) C. R. देवधर	1	
30	उत्तररामचरित-मूलमात्रं -डॉ. बेलवलकर (Critical Text)	1	
31	मेघदूत- K. B. पाठक		
32	पञ्चतन्त्रमूल- Dr. Edgerton	1	
33	काव्यादर्श- S. K. बेलवलकर		
34	काव्यालंकारसूत्रवृत्ति		
35	—Eng- Trans- by G. झा.		
36	Rastrakūtās & their Times —डॉ. आळतेकर		
37-22	श्रुतिs of Ind-Music-तेलंग		
38	Hindu Ethics. चंदावरकर		
39	डॉ. G. झा. Commn. Vol.		
40	कृष्ण Problem- ताडपत्रीकर		

Poona Oriental Series No. 88

॥ श्री ॥

'श्रीनिवास' विरचिता

म. गान्धी-प्रणीत-राष्ट्रोद्धार-तत्त्वविवेो

गान्धी-गीता

GĀNDHI GĪTĀ

Being the elucidation of Gandhian Philosophy in Sanskrit Verse with Notes & Summary in English

By

S. N. TADPATRIKAR, M. A.

With Foreword in Sanskrit

By

His Excellency Shri M. S. ANEY,

Governor of Bihar, Patna.

And in English

By

onourable Shri G. V. MAVLANKAR,

peaker, Indian Dominion Parliament,

Oriental Book Agency

15, Shukrawar, POONA 2 (India).

30th January 1949] [Price Rs. 3-12

Chapter 3 - पुरावृत्तयोग - Stanzas 59 11-16

Gives a short history of how, since centuries past, mutual quarrels led to India's bondage; how ultimately the English, by their shrewd policy, became the sole masters of the vast land. This leads to an enumeration of the national merits of the Rulers, which the Mahatma exhorts his people to imitate for the good of the mother land.

Chapter 4 - गुणत्रयविभागयोग - Stanzas 29 17-19

Exposition of the three essential quantities in man : Sattva or virtue; Rajas or passion; and Tamas or ignorance. Of these, the ultimate success of a union based on Sattva; and their comparative value from the national point of view.

Chapter 5 - ऐक्ययोग - Stanzas 20 19-21

Describes how the united strength of people, resting on Sattva, is unconquerable for even the armed forces of Rajas or Tamas.

Chapter 6 - राज्ययन्त्रयोग - Stanzas 22 21-23

The machinery of the British Government, stating that the king being only in name, the people with the party in power, really rule.

chapter 7 - बहिष्कारयोग - Stanzas 38 23-26

States how it is futile to persuade any single individual in power, while the machinery

set in motion by the English, is working towards grinding down the people; so the way to freedom is to be paved by beginning with bycott–social, as well as industrial and political – of everything English.

Chapter 8 - अनुकरणयोग - Stanzas 51 27-31

Describes how foolish imitation of the Rulers has led us into deeper bondage and moral degradation.

Chapter 9 - सेवाधर्मयोग - Stanzas 26 31-33

Attached service to foreign rulers, makes one hostile towards his own brothers, and thus brings about total ruin of one's country by one's own hands.

Chapter 10 - राष्ट्रधर्मयोग – Stanzas 55 33-38

Apart from the religions all over the world, there is a religion for the nation, as a whole; this should predominate all other considerations; women, too, are guides in family life, and as such they should properly realise the importance of this national religion.

Chapter 11 - स्वराज्ययोग - Stanzas 90 38-45

Begins with a definition of Svarajya, and gose on to give, in short, a history of the birth and rise of the Indian National Congress, with subsequent developments in the

Chapter 12 - ईश्वराधिष्ठानयोग.- Stanzas 25 45-47

Discusses whether the God has any place in political struggle, and concludes that as all religions admit the existence of the Supreme Being, a prompting from that Source should govern all our actions in this field, too.

Chapter 13 - लोकसंग्रहयोग - Stanzas 28 48-50

Discusses the essential merits of a public leader and his place in national life.

Chapter 14 - विभूतियोग - Stanzas 54 50-54

Gives a short list of the champions of Indian political struggle.

Chapter 15 - पुरुषोत्तमयोग. - Stanzas 30 55-57

States as to what should be the chief merits in the best of men.

Chapter 16-दैवासुरसंपद्विभागयोग-St. 30 57-60

This chapter of the Bhagavadgita is given here, in the light of people, Godly and demoniac, affecting the political situation of a country.

Chapter 17 - मातृदर्शनयोग - Stanzas 42 60-65

Mother Hind presents herself in human form before her sons, and, deploring her condition in bondage, exhorts them to cease all differences and follow the Mahatma.

Chapter 18 - मात्रादेशयोग - Stanzas 74 66-72

Discusses the propriety of a spirit of sacrifice, necessary in the cause of national uplift, laying stress on the unity of all Indians, doing away with the social ban against the socalled 'untouchables' who, in fact, deserve kind treatment at the hands of the upper classes.

Chapter 19 - मुस्लीमविरोधयोग - Stanzas 29 72-74

Muslims having several numerous advantages in the New Constitution, still clamoured for more, and bitterly complained against the Congress activities, saying that their brothers suffered from great injustice, and persecution in the Congress provinces.

Chapter 20 - बन्धनयोग - Stanzas 51 75-79

Congress ministries having resigned as a protest against Viceroy's making India a partisan in the second world war, without consulting the leaders, the Government took drastic measures to suppress public feeling. Deputation of Cripps to India having failed, Mahatma Gandhi started his 'Quit India' compaign, so that, on 9th August 1942, all Congress leaders were arrested. While in custody, Gandhiji lost his devoted wife, Kasturba.

Chapter 21 - मुस्लीमाभियोग - Stanzas 57 79-83

The Muslims of the League having offered to take up rule, and the offer being rejected by the Viceroy; started their 'Direct Action'

in Bengal, where thousands of Hindus were mercilessly slaughtered.

Chapter 22 - राष्ट्रखण्डनयोग - Stanzas 19 84-85

Ultimately, India is split into many pieces; Pakistan in the East and West, numerous Indian states made independent, and the remaining part to be Indian for the Nationals.

Chapter 23 - आपद्योग - Stanzas 81 85-92

Seeing great trouble from Muslims all over the country, Gandhiji urging his people not to think of revenge, but to be tolerant in attitude, and finally the sad death of the Mahatma. The whole nation suffering from restlessness and despir.


Chapter 24 - सर्वमंगलयोग - Stanzas 70 92-98

In spite of the difficult problems before them, the followers of the Mahatma lead the nation, striving for the betterment of the people, and in time, it is hoped the goal of happiness for all, will be reached.

शुद्धिपत्रम् 99-100

Notes 1 - 8

पुरस्कारः



श्रीमद्भगवद्गीताया अनुकृतिरूपाणां रामगणेशादिनामपूर्वाणां कासांचन गीतानां नामानि लोकमान्यतिलकमहोदयैः स्वकीये गीतारहस्ये निर्दिष्टानि वर्तन्ते । तासां सर्वासां विवेचनं तु ईशप्राप्तिः संसारबन्धनिर्मुक्तिरित्यादिविषयानधिकृत्यैव कृतमद्ययावदास्तिकैः पाठकैर्भक्त्या अभ्यस्तमपि दृश्यते । इयं गान्धीगीता तु भगवद्गीताया एव अनुकरणरूपापि सर्वाभ्यः प्राचीनगीताभ्यः सर्वथा पृथगेव विषयं विस्तरेण विवेचयतीतीयानस्या विशेषः । येयमस्माकं मातृभूमिः पुरा वैभवस्य परां कोटिमाप्नोत् सैवेदानीं परदास्यनिगडबद्धा कथं मोचिता स्यान्मुक्तायाः पुनरपि विभवप्राप्तिः कथं वा भवेदित्यादिविषयाः प्रसङ्गतः अस्यां गान्धीगीतायां चर्चिताः । तेन मन्ये इयं गीता न केवलं धार्मिकैः अपि तु राजकीयसामाजिकादिविविधविषयविवेचकैरपि सर्वैरेव भारतीयैः सम्यगधीता, आचरिता च राष्ट्रस्य समुन्नतये प्रभवेदिति ।

कीदृग्विधेयमनुकृतिर्भगवद्गीताया इति विचार्यमाणे प्रथमंमेव तावद् धृतराष्ट्रसंजयावत्रापि दृश्येते । कविमते धृतराष्ट्रः साम्राज्यमदान्धानामांग्लानां प्रतीकभूतः संजयश्च तस्य वृत्तनिवेदक उपदेष्टा च । एवमेव यथा युद्धकाल अर्जुनस्य विषादः समजनि तथात्रापि यदा महात्मनोऽनुयायिनः भारतीयाः सत्याग्रहाय प्रवृत्तास्तदैवैषु केषांचन शंका संजाता । यदप्रतिकारिणां कथं नाम यशःप्राप्तिरपि तु सर्वथा नाश एव निश्चित इति । एवमेवाग्रेऽपि अध्यायान्तरेषु 'गुणत्रयविभागयोगः (अ. ४), विभूतियोगः (अ. १४),

पुरुषोत्तमयोगः (अ. १५), दैवासुरसंपद्विभागयोगः (अ. १६), इत्यादि विषयाणां प्रतिपादनं राष्ट्रियदृष्ट्या सम्यक्तया कृतम् । तत् सर्वेषां कौतुकास्पदं भवेत् । विश्वरूपदर्शनं यथा भगवद्गीतायां तथात्रापि 'मातृदर्शनं, मात्रादेशः' इत्यध्यायद्वये (अ. १७।१८) कविना राष्ट्रस्य पारतन्त्र्यनाशाय ऐक्यसंपादनमेव साधनमिति उपदिष्टम् ।

प्रथमं तावद्भगवद्गीतानुसारेण गान्धीगीताया अपि अष्टादशैवाध्याया आसन् । किंतु अतीतेऽपि बहुकाले यदा इयं गीता अप्रकाशितैवासीत्, तदा कालवशान्नेतॄणां समुद्यमेन राष्ट्रे या या नवीना घटनाः समभूवंस्तेषां निर्देशोऽपि अस्यां गीतायां करणीय इति यच्छ्रीमद्भिर्मावळंकरमहोदयैः सूचितं तदनुसारेण कविना षट्सु अध्यायेषु संक्षेपतः सर्वं यथावन्निर्दिष्टमिति समुचितमेव ।

किं बहुना ! यथा श्रीमद्भगवद्गीता महाभारते समावेशिता, अन्याश्च गीतास्तेषु तेषु पुराणेषु प्रवेशिताः तथैवेयं गान्धीगीता संक्षेपतो राष्ट्रस्वातन्त्र्यसंपादनेतिहासं विवृण्वती महत्यां स्वातन्त्र्य-संहितायां परिणमितुमर्हति । आशासे च कविरपि इदं महत्कार्यं संपादितुं आवश्यकं द्रव्यसाहाय्यादि लब्ध्वा यथोचितं यशः प्राप्नुयादिति । अलमति विस्तरेण ।

भवदीयकृपाकांक्षी

अणे इत्युपाह्वः श्रीहरिसूनुर्माधवशर्मा.

FOREWORD.

The first compilation of this (Gāndhi) Gītā in 1931-32, contained only 18 Chapters (Adhyayas) as the author intended it to be a complete imitation of Shree Bhagavad Gītā, and six Chapters have been added later on. We begin this Gītā too, with the **धृतराष्ट्र** and **सञ्जय** as in the original, representing, respectively, the British Imperialist and the impartial Observer. The scene opens with the famous Dandi march (March 1930), and the dialogue between the Bharatīya, the representative Indian and the Mahātmā, with the despondent mood of the former (the **विषादयोग**) as in the Bhagavad Gītā. Subsequent Chapters give the history of the struggle of Indian independence. Incidentally, we have, in this Gītā, too, the **पुरुषोत्तम** defined, **विभूतिs** enumerated, **दैवी** and **आसुरसंपद्** described, in a manner as would fit in with the situation of the Mother-land. There is also the **मातृदर्शन**, the mother Hind presenting herself in spirit and form, on lines of the **विश्वरूप-दर्शन** of the Bhagavad Gītā. The first text ended with the Round Table Conference, the Poona Pact and the Unity Conference at Allahabad.

The central theme of preaching was **अनासक्ति**, the same as that of the Bhagavad Gītā - Performance of duty without attachment or expectation of the

fruit – Duty in the Political field, with the creed of non-violence **अहिंसा**, and devotion to **सत्य**.

The manuscript lay idle with the author all these years and when some time after the sad death of Mahatma, the author came to me for advice about its publication, I suggested that the text may be brought upto-date. Six more Chapters were thereupon added; and the present last Chapter, mentions some of the problems before the leaders of Free India and concludes with a fervent hope for Peace and Prosperity (**सर्वमङ्गल**) to the nation.

It is interesting to note that, though the author has passed his life outside the blaze of Politics, and in Sanskrit Research at the Bhandarkar institute, he could not keep himself wholly aloof from the movement for the freedom of the country; and though he did not enlist himself as a soldier in the active battle, he continues an earnest student of the struggle as his work amply shows.

It goes without saying, that, in spite of the present general ignorance of Sanskrit, the language has to the Indian, a halo of sacredness. We find numerous presons who recite the Sanskrit text of the Bhagavad Gītā with immense devotion. The author hopes that Indians will include the recitation of this Gandni Gītā in their daily religious rites, and thus, imbibe in themselves the spirit of **सत्य** and **अहिंसा** for which the Mahatma lived and died !

The Bhagavad Gītā as well as its other imitations, form part of some larger work-an Epic or Purāṇa. The present Gandhi Gītā, too, would well deserve to be taken as a nucleus for a larger work - a new Epic - let us call it as **स्वातन्त्र्यसंहिता**-embodying the full details of the national struggle for freedom. May I hope that if the author would undertake to do this, he will have the necessary facility for this ?

Lastly, I cannot but congratulate the publisher for having undertaken the publication, which speaks of his love for the Sanskrit language, as the publication cannot obviously be a business proposition.

" Seva Kutir "
16, Maharāshtra Society,
Ellis Bridge, Ahmedabad.
16th January 1949.

G. V. Mavlankar.

PREFACE.

With a Sanskrit Foreword by H. E. Shri M. S. Aney and an English one by the Hon. Shri G. V. Mavlankar, there remains very little for the author, to say about the nature of this work. Yet he would be failing in his sacred duty, if he does not express his gratitude towards those who have, one way or other, helped him in preparing and bringing out this work.

But before this is done, the author would crave indulgence of the reader, and express a few words about the way in which he came to conceive the idea of the Gāndhi Gītā, in Sanskrit. While the whole nation was astir with the C D. movement, started by the Mahātmā, and news-papers with full of daily reports of Lathi charges against non-violent followers of the movement, it was impossible, even for the author,—a man in a corner – to keep indifferent to these important developments in the political thought of the country. In fact, it would not be too much to say that every literate man took a keen interest in the movement and the pros and cons of the same were freely discussed, even by persons, most distant from the movement itself.

The main point at issue was the success of non-violence against violence; and old files of ' Young India ' would provide numerous instances of discussions of this nature. This led the present author to think of a new political Gītā, on the lines of the Bhagavadgītā, and he set himself to work on the idea. Though there might really have been serious doubts even in the minds of the followers of the movement, let it be stated here, as an honest truth, that the present dialogue, based on these doubts, between the Bhāratīya and the Mahātmā, is of a purely imaginary nature. The background selected, namely the C. D. meeting at Dandi, in Gujarat, was, of course, true.

As regards the composition in Sanskrit, the author has to admit that, in spite of there being only a limited number of persons who have a real liking for the old language, it was mainly his constant association with the Mahābhārata work in the Bhandārkar Institute, at Poona, that inspired and enabled the author to do this work in Sanskrit.

The first person to carefully go over the first draft, and suggest the necessary changes therein, was Pandit Bālācharya Khuperker of Kolhapur, then a Sanskrit teacher in the Satara High School. The British Government's rigorous policy

of suppressing the Congress movement, kept the manuscript idle for some years, till the close of the second world war brightened the prospectus of Indian freedom; and when, sometime back, the Hon. Shri Mavlankar was, for same days in Poona, staying with his relation Dr. R. N. Sardesai, the author approached to guset through the host. Shri Dadasaheb did kindly read the author's manuscript, and expressed his favourable opinion about the work. Still, the author's efforts to find a publisher could not secceed, probably on account of the work being in Sanskrit, and because, too, the author was not a prominent figure in public life.

When, after the sad death of the Mahatma, the idea of a commemoration Fund was launched by Indian leaders, the author again was urged by the hope, and he approached some, seeking their help and advice. Shri Dadasaheb advised that the work be first brought upto-date, as the original draft had ended only with the Poona pact. H. E. Lokanayaka Aney praised the author's work in flattering words, in his letter dated the 5th April 1948, finally thanking the author " for the service... ... ... done to immortalize Gandhiji's philosophy by writing Gandhi Gita in Sanskrit." While the Hon. Shri Balasaheb Kher, Premier of Bombay, during an interview granted to the

author, on 16th June last, most kindly promised to try for the publication, through help from the Gandhi Memorial Fund. The author first took up Shri Dadasaheb's suggestion, and added six more Adhyāyas to bring the text up-to-date. And then, while discussing the chances of publication with his friend Dr. R. N. Serdesai, the latter surprised the author, not a little, by saying that his Oriental Book Agency would undertake to publish this work.

So, after all these years, the work is now before the kind reader, who, it is hoped, will accord it the welcome it deserves. In spite of his utmost carefulness, the author may here have, to his credit some errors of commission and omission, in expounding the philosophy of Gandhiji, for which he has to tender his apologies. But the author has to express his heartfelt gratitude to the persons above mentioned for the kindness they showed in dealing with his work. May it please the Almighty that the author meets with such noble hearts whenever he is in need of them.

The author deeply regrets the printing mistakes left in the text; and the kind reader is suggested to have the text corrected, according to the Errata, before reading it.

Some of the words in the Sanskrit 'Puraskara' have been left without proper Sandhi, in order to facilitate easy understanding.

B. O. R. Institute, Poona.

Makar Samkranta, **S. N. Tadpatrikar.**

14th January, 1949.

अथ ध्यानम्।

ॐ आर्ताय प्रतिबोधितां भगवता गान्धीमुखेन स्वयं
सद्यः संग्रथितां यथार्थमतिना लोकस्य चोद्दीपिनीम्।
सत्यार्थप्रतिपादिनीं भगवतीं राष्ट्रैक्यसंवादिनी—
मम्ब त्वामनुसंदधामि विमले गीतेऽनृतद्वेषिणीम् ॥ १ ॥

कर्मचन्द्रसुतं धीरं मोहनं लोकनायकम्।
महात्मानं सतां श्रेष्ठं गान्धीं वन्दे जगद्गुरुम् ॥ २ ॥

मातृभूमिं नमस्कृत्य महात्मानं सुतोत्तमम्।
ध्यात्वा च परमेशानं गीताधर्मं समाचरेत् ॥ ३ ॥

पुरा भगवता प्रोक्तः कुरुपाण्डवयो रणे।
क्लिश्यमानाय पार्थाय कर्मयोगः सनातनः ॥ ४ ॥

पश्चादनेकैराचार्यैः स्वभाष्यैर्विशदीकृतः।
इदानीं वर्णितश्चापि स एवायं महात्मना ॥ ५ ॥

फलासक्तिं परित्यज्य कार्यं कर्म समाचर।
कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ॥ ६ ॥

आसक्तिरेव बन्धाय बन्धे नरकयातना।
अनासक्तिर्विमोक्षाय प्रभवेत्सर्वकर्मसु ॥ ७ ॥

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततः कर्मणि युज्यस्व नैवं खेदमवाप्स्यसि ॥ ८ ॥

अध्येष्यते यः संवादं भारतीयमहात्मनोः।
आचरिष्यति च प्रेम्णा स सुपुत्रो भवेद् ध्रुवम् ॥ ९ ॥

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ १० ॥

ऊर्ध्वबाहुर्विरौम्येष तच्छृणुध्वमतन्द्रिताः ।
ऐक्याद्बन्धस्य निर्मुक्तिस्तदैक्यं किं न सेव्यते ॥ ११ ॥
प्रत्यवायो न धर्मस्य सर्वे वै बान्धवा इह ।
वन्देमातरमित्येव राष्ट्रमन्त्रः सनातनः ॥ १२ ॥
गायत्र्यक्षरसंख्याका अध्याया अत्र निर्मिताः ।
श्लोका अधिसहस्राश्च गीतायां ग्रथिता मया ॥ १३ ॥
श्रीनिवासप्रणीतेयं 'गान्धीगीता' शुभाशया ।
भारतीयसमुन्नत्यै सदा स्याच्छान्तिदायिनी ॥ १४ ॥

॥ श्रीरस्तु ॥

गान्धी--गीता.

अथ प्रथमोऽध्यायः ।

धृतराष्ट्र[2] उवाच ।

धर्मक्षेत्रेऽत्र सर्वत्र समवेता युयुत्सवः ।
मामका भारतीयाश्च किमकुर्वत संजय ॥ १ ॥

संजय उवाच ।

दृष्ट्वा तु भारतानीकं व्यूढं सत्याग्रहाय वै ।
मन्त्रिणः स्वान्समाहूय राजा[3] वचनमब्रवीत् ॥ २ ॥
पश्यतैतां भारतानां सर्वत्र महतीं चमूम् ।
प्रसृतामत्र वै राष्ट्रे व्यूढामपि महात्मना ॥ ३ ॥
अत्र शूरा हि नेतारः शिक्षिता राजकारणे ।
काश्मीरीयौ पितापुत्रौ मोतीलालजवाहरौ ॥ ४ ॥
सुभाषसेनगुप्तादि वङ्गीया लोकविश्रुताः ।
धुरीणाः परमोदारा युक्तायुक्तविचक्षणाः ॥ ५ ॥
आन्ध्राश्च दाक्षिणात्याश्च द्राविडाश्चापि सर्वशः ।
पञ्जाबीयाः सैन्धवाश्च वैदर्भीयाः समन्ततः ॥ ६ ॥
नास्तीह भारते वर्षे देशमात्रं हि यत्र ते ।
न नेष्यन्ति जनान्सत्रे सत्याग्रहचिकीर्षवः ॥ ७ ॥
एवं राज्यधुरीणेभ्यः पीडां कर्तुमिहोद्यताः ।

तान्वयं प्रतियोत्स्यामो सर्वयत्नेन जागृताः ॥ ८ ॥
वयं हि राज्ययन्त्रस्य रक्षितारः सहस्रशः ।
स्वे स्वे कर्मण्यभिरताः सिद्धिं विन्देम शाश्वतीम् ॥ ९ ॥
दक्षाः कर्तव्यमुद्दिश्य प्रान्तीया येऽधिकारिणः ।
सर्वाञ्जनान्पराजित्य यशः परममाप्नुयुः ॥ १० ॥
स्वल्पोऽपि सेवको ह्यत्र पदे महति योक्ष्यते ।
दण्डेन प्रतिकर्तारं परां पीडां करिष्यति ॥ ११ ॥
वाक्पारुष्यं तथा शाठ्यं युद्धे चैवाङ्गपीडनम् ।
यत्किंचिदपि संयोज्य कुर्याद्वै लोकनिग्रहम् ॥ १२ ॥
अत्रापि किंचिद्वक्ष्यामि नीतिं तां संनिबोधत ।
राजकार्यधुरीणानां प्रत्यये समुपस्थिताम् ॥ १३ ॥
गतानुगतिको लोको न लोकः पारमार्थिकः ।
धुरीणाननुसृत्यैव लोकः कर्मसु वर्तते ॥ १४ ॥
कार्याकार्यविचारेषु रमन्ते न जनाः क्वचित् ।
अग्रणीर्यद्वदत्येषां तत्कुर्वन्त्यविचारतः ॥ १५ ॥
तस्माल्लोकधुरीणानां निग्रहे जाग्रताग्रतः ।
तेषां निरोधे कार्यस्य घातः स्यान्नैव संशयः ॥ १६ ॥
शतानामग्रणीरेको निरुद्धश्चेत्प्रयत्नतः ।
कार्ये नैकोऽपि चलति विमूढाः सर्व एव ते ॥ १७ ॥
राजप्रतिनिधेरेवं श्रुत्वा ते मन्त्रिणस्तदा ।
सर्वे स्वस्थानमासाद्य युद्धोद्यमचिकीर्षवः ॥ १८ ॥
स्वसेवकान्समाहूय कर्तव्यं समुपादिशन् ।
कार्यकालं प्रतीक्षन्ते उद्यताः सर्वतो दिशः ॥ १९ ॥
एतस्मिन्नन्तरे राष्ट्रे धुरीणास्तत्र तत्र ह ।
लोकसंघेनानुयाताः कार्यायैव प्रतस्थिरे ॥ २० ॥

महात्मना यत्संदिष्टं तत्सर्वं साधयन्ति ते ।
राष्ट्रबन्धविमोक्षाय प्रारब्धोऽयं महाक्रतुः ॥ २१ ॥
विस्तीर्णं भारतं वर्षं नानाजनपदैर्युतम् ।
हिमालयादिशैलैश्च सरिद्भिर्बहुभिस्तथा ॥ २२ ॥
आसेतु तदिदं सर्वमांग्लैः स्ववशगं कृतम् ।
स्थापिताश्चाधिकारेषु स्वकीयास्तत्र तत्र हि ॥ २३ ॥
दासभावगताः सर्वे दीना हिन्दसुता ध्रुवम् ।
शरणं नैव पश्यन्ति कमप्यत्र धरातले ॥ २४ ॥
भिन्नाचारा भिन्नधर्मा भिन्नभाषास्तथैव च ।
भेदमेव समाश्रित्य दुःखिताः कोटिशो जनाः ॥ २५ ॥
ब्राह्मणैरब्राह्मणाश्च हिन्दुभिर्म्लेच्छजातयः ।
खिस्तीया अपि सर्वैस्ते रमन्ते कलहे सदा ॥ २६ ॥
न कस्यापि सुखं लोके शान्तिश्च मरणे ध्रुवा ।
एवं संपीडिताः सन्तो नैक्यं कुर्वन्ति कुत्रचित् ॥ २७ ॥
महात्मना तु सर्वेषां दुःखबन्धविमुक्तये ।
उपायं चिन्तयित्वैव समाहूताः सहस्रशः ॥ २८ ॥
लॅाहोरपुर्यां मिलितैर्धुरीणैर्हिन्दवासिभिः ।
स्वीकृतं व्रतमेतद्धि यद्राष्ट्रस्य हितावहम् ॥ २९ ॥
स्वातन्त्र्यं प्रार्थयन्तोऽपि तन्नाद्यापि लभामहे ।
आंग्लराजसभा नैव स्वयं दातुं समुत्सहेत् ॥ ३० ॥
राजप्रतिनिधिश्चात्र राजा इव विलासभुक् ।
अकिंचित्कर एवासौ सभायाः संमतिं विना ॥ ३१ ॥
स्वत एवोद्यमं तस्मात्कर्तुमद्य यतामहे ।
कार्यं सिद्ध्यति यत्नेन दैववादः सुदुर्बलः ॥ ३२ ॥
एवं विचार्य कार्यस्य दिशां निश्चेतमद्यतः ।

संदिदेश महात्मासौ स्वकीयांल्लोकनायकान् ॥ ३३ ॥
सहते क्लेशमत्युग्रं प्रतिकारमचिन्तयन् ।
पीडितोऽपि भृशं नैव प्रतिपीडां करोति यः ॥ ३४ ॥
अक्रोधो विगतक्लेशः स्वकार्ये रतधीः सदा ।
स एव राष्ट्रकार्येऽस्मिन्वक्तव्यो युक्त इत्यपि ॥ ३५ ॥
राजशासनभङ्गोऽपि व्यक्तं तेनैव शक्यते ।
तदेव राष्ट्रस्वातन्त्र्यव्रतस्य प्रथमं पदम् ॥ ३६ ॥
सर्वेषां सुकरं कार्यमधुना दिश्यते मया ।
सर्वैर्यत्नः समास्थेयस्तस्य कार्यस्य सिद्धये ॥ ३७ ॥
अहिंसा ब्रह्मचर्यं च सत्यं चैव तथा परम् ।
प्राणात्ययेऽपि न त्याज्यमस्मदीयैरिदं त्रयम् ॥ ३८ ॥
शासनं विहितं राष्ट्रे यत्परैस्तन्न सौख्यदम् ।
अतस्तस्यापकरणे क्रमेण प्रयतामहे ॥ ३९ ॥
लवणं जीवनं जन्तोरौषधीनां तथैव च ।
समुद्रस्य जलाज्जातं विनामूल्यमयत्नतः ॥ ४० ॥
तत्रापि करमादाय आंग्ला लोभपरायणाः ।
अन्यायस्य परां कोटिमेवं गच्छन्ति वै भुवि ॥ ४१ ॥
तदेव शासनं तेषां प्रथमं न्यायतो वयम् ।
अवमत्यैव लवणं समुद्रादानयाम वै ॥ ४२ ॥
यद्यस्मान्सेवकास्तेषां विरोधं कुर्वते तदा ।
लवणाहरणे यत्नस्तथापि स भविष्यति ॥ ४३ ॥
महात्मनस्तेऽनुमते कार्यं निश्चित्य चेदृशम् ।
स्वं स्वं स्थानमनुप्राप्ताः स्वानुगान्समुपाह्वयन् ॥ ४४ ॥
सहस्रशोऽनुगास्तेषामग्रणीनां मते स्थिताः ।
सर्वत्र भारते वर्षे मिलिताः कार्यतत्पराः ॥ ४५ ॥

तथैव गुर्जरे देशे जलधेस्तीर उत्तमे ।
समेता भारतीयास्ते महात्मा येषु दृश्यते ॥ ४६ ॥
राजकीयाश्चापि तत्र सेवका राजशासने ।
दक्षाः संमुखतो ह्यासन्गृह्य शस्त्राणि सर्वशः ॥ ४७ ॥
सशस्त्रा राजकीयास्ते भारतीयास्त्वशस्त्रिणः ।
मनोनिश्चय एवैषां शस्त्रं दिव्यमलौकिकम् ॥ ४८ ॥
तत्रापि केचित्साशङ्काः कार्यसिद्धावनेकधा ।
महात्मानमुपागम्य सभया इव ते स्थिताः ॥ ४९ ॥

महात्मोवाच ।

किमित्यागमनं ब्रूत भयं कस्मादुपस्थितम् ।
शङ्का वा कात्र संजाता कार्यं चेदं महत्तमम् ॥ ५० ॥
निःशङ्कं मत्समीपेऽत्र कथयध्वं मनोगतम् ।
मा कार्यस्य विलम्बोऽस्तु आलस्यं सर्वघातकम् ॥ ५१ ॥

संजय उवाच ।

तेषामग्रेसरः कश्चिद्युवा च प्रियकृत्सुहृत् ।
सर्वार्थे प्राञ्जलिर्भूत्वा इदं वाक्यमुवाच ह ॥ ५२ ॥
कार्यनिष्ठा दृढास्माकं संशयस्तत्र नो मनाक् ।
राजकीयांस्तु दृष्ट्वैतान्समेतांश्चलितं मनः ॥ ५३ ॥
सशस्त्राः सर्व एवैते अशस्त्रान्शस्त्रपाणयः ।
अस्मान्सर्वान्हनिष्यन्ति मृत्युरत्र सुनिश्चितः ॥ ५४ ॥
मृतेष्वस्मासु कार्यस्य भविता घात एव च ।
राष्ट्रस्य को वा लाभः स्यान्मरणे वद ईदृशे ॥ ५५ ॥
तदलं साहसेनेत्थं उपायोऽन्यो विचिन्त्यताम् ।
युद्धं तुल्यबलैर्युक्तं विषमैर्न सुखावहम् ॥ ५६ ॥

॥ इति श्रीगान्धीगीतायां भारतीयविषादयोगो नाम प्रथमोऽध्यायः ॥ १ ॥

अथ द्वितीयोऽध्यायः ।

संजय उवाच ।

तेषां तथा विषण्णानां भारतानामुदारधीः ।
मेघगम्भीरया वाचा महात्मा वाक्यमब्रवीत् ॥ १ ॥
कुतो वः कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यं राष्ट्रहानिकरं महत् ॥ २ ॥
समाश्रयोऽयं क्लैब्यस्य सर्वथा नैव शोभते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठत भारताः ॥ ३ ॥
अस्माकं च तथैतेषां विचार्यैव बलाबलम् ।
मया प्रकल्पितः सोऽत्र अपूर्वोऽयं रणक्रमः ॥ ४ ॥
तेषां हि वधसामग्री विपुला विद्यते यदि ।
निःशस्त्रप्रतिकारेण तानहं जेतुमुत्सहे ॥ ५ ॥

भारतीय उवाच ।

निःशस्त्रेण कथं तेषां सशस्त्राणां प्रतिक्रिया ।
वृथैवायं समुद्योग इति मे निश्चिता मतिः ॥ ६ ॥

महात्मोवाच ।

पारतन्त्र्यनिविष्टानां दीनानां दास्यपीडया ।
संशयं यास्यमानानां को लाभो जीवितेन वै ॥ ७ ॥
प्रशास्तॄणां कठोरेण शासनेन समाकुलाः ।
प्रतिक्षणं परायत्ता वृथा जीवन्ति ते नराः ॥ ८ ॥
त्रयस्त्रिंशद्धि कोटीनां विपुलं राष्ट्रमीदृशम् ।
आंग्लानां शासनेनैवमचिरात्क्षयमेष्यति ॥ ९ ॥
सुवर्णभूमिरित्येषा या पुरा प्रथिता किल ।
साधुना शृङ्खलाबद्धा कष्टं जीवति पश्यत ॥ १० ॥

सत्याग्रहोऽयं हि मया योजितो बन्धमुक्तये ।
यशसे प्रभवेन्नूनं सर्वैः स्यात्स्वीकृतो यदि ॥ ११ ॥
अत्रात्मिकबलस्यैव धारणं समपेक्ष्यते ।
सत्यं ज्ञानमनन्तं च सत्सर्वत्र विशिष्यते ॥ १२ ॥
क्रोधद्वेषादिविकृतिहीनमानन्दसंयुतम् ।
बलं येनार्जितं लोके स कार्येऽस्मिन्प्रशस्यते ॥ १३ ॥
लोककल्याणसिद्ध्यर्थमृषिभिस्तपसा पुरा ।
संपादितं बलं चैतत्तेन ते मान्यतां गताः ॥ १४ ॥
अधुनापि बलावाप्त्यै कार्यो यत्नः सदा जनैः ।
समुन्नतिकरो मार्गः सेव्योऽयमिह चादरात् ॥ १५ ॥

भारतीय उवाच ।

एतेषु राजकीयेषु दृश्यन्ते बान्धवास्त्वमी ।
अस्मदीया एव सर्वे अस्मान्हन्तुमिहोद्यताः ॥ १६ ॥
कथं न ज्ञायते दैन्यमेतै राष्ट्रस्य वा पुनः ।
ज्ञात्वापि तद्विवृद्ध्यै किं यत्नं कुर्वन्त्यतन्द्रिताः ॥ १७ ॥
यथास्माकं तथैतेषां जन्मभूमिरियं सती ।
कथमेतन्न पश्यन्ति लोभोपहतचेतसः ॥ १८ ॥
आंग्लानां शासनं स्वेषु संप्रधार्य शिरःसु ते ।
न पश्यन्ति विमूढाः किं स्वीयामेव हि दुर्गतिम् ॥ १९ ॥

महात्मोवाच ।

परिणामोऽयमेतस्य पारतन्त्र्यस्य मा शुचः ।
पारतन्त्र्ये ह्यनर्थानां जायते हि परंपरा ॥ २० ॥
राष्ट्रस्य शीलं चारित्र्यं परकीयेषु राजसु ।
भ्रष्टं भवति लोकोऽपि दासभावैकतत्परः ॥ २१ ॥
राजकीयस्य यो वेषस्तमेवानुकरोति च ।

तमेव मानयन्स्वीयं धर्माचारं त्यजत्युत ॥ २२ ॥
तेषां प्रसादमन्विच्छन्सदा श्वेव पुरः स्थितः ।
स्वत्वं संत्यज्य बन्धूनां घाते भवति चोद्यतः ॥ २३ ॥
एतां श्ववृत्तिमालम्ब्य जीवन्स बहु मन्यते ।
नरके पच्यमानोऽपि तत्रैवानन्दमावहन् ॥ २४ ॥

भारतीय उवाच ।

एतेषां भ्रमनाशश्च केनोपायेन मे वद ।
न शक्नोमि स्थितिं सोढुमीदृशीं क्लेशकारिणीम् ॥ २५ ॥

महात्मोवाच ।

एतेषां नैव मुक्तिः स्यात्सेवाधर्मात्कथंचन ।
आदिमध्यावसानेषु सेवका एव केवलाः ॥ २६ ॥
अनन्यगतिका ये तु राजसेवां प्रकुर्वते ।
तेऽनुकूलेषु कालेषु स्वातन्त्र्यं धारयन्ति हि ॥ २७ ॥
एतादृशानां मुक्त्यर्थं सेवकानां सुखाय च ।
राष्ट्रस्वातन्त्र्ययज्ञोऽयं सर्वैरपि विधीयताम् ॥ २८ ॥
अस्मान्प्रतिकरिष्यन्ति येऽप्यत्राजन्मसेवकाः ।
शस्त्रैश्चापि हनिष्यन्ति मात्र भीतिं वृथा कृथाः ॥ २९ ॥
यावदेको मृतस्तावदन्यस्तत्रागमिष्यति ।
सत्पक्षे वर्तमानानां विजयोऽन्ते भविष्यति ॥ ३० ॥
पुरा यथा रावणरामयुद्धे
मायादृष्टा विविधा राक्षसस्य ।
क्षेत्रं हि तद्रावणपूर्णमासी-
त्तथा बतैषामपि युद्धनीतिः ॥ ३१ ॥
यत्र यत्र वयं यामस्तत्र तत्राधिकारिणाम् ।
बलं भीषयतीहास्मान्भीषणैश्च स्वकर्मभिः ॥ ३२ ॥

सशस्त्रैः शस्त्रहीनानामपूर्वं युद्धमीदृशम् ।
शारीरं बलमेतेषामस्माकं मानसं बलम् ॥ ३३ ॥
पुरा प्रसंगे युधि कौरवाणां
पाण्डोः सुतास्तुल्यबलास्तथासन् ।
समेत्य शत्रूंस्तरसा विजित्य
राज्यं स्वकीयं पुनराप्तवन्तः ॥ ३४ ॥
अस्मिन्विचित्रे तु रणप्रसंगे
अस्माास्विदं वैपरीत्यं समेतम् ।
कारागृहे शृङ्खलया निबद्धा
रणे हताः स्याम च सेवकैर्वा ॥ ३५ ॥
कारावासश्चिरतनः अद्य वा श्वो भविष्यति ।
मरणं वा भवेदत्र न तथापि निवर्तनम् ॥ ३६ ॥
इतो गतेषु चास्मासु अन्ये भारतवासिनः ।
कार्ये स्थिताः पुनः सर्वे सिद्धिमाप्स्यन्ति पुष्कलाम् ॥ ३७ ॥

॥ इति श्रीगान्धीगीतायां पारतन्त्रयोगो नाम
द्वितीयोऽध्यायः ॥ २ ॥

अथ तृतीयोऽध्यायः ।

भारतीय उवाच ।

इतो गतेषु चास्मासु भीताः क्लेशाद्यदा परे ।
नागमिष्यन्ति कार्यार्थं तदा हानिर्भविष्यति ॥ १ ॥
राजकीयाः सुसंरब्धा जनानधिकमेव ते ।
व्यथयिष्यन्ति तेनायं कार्यलोपो भवेद्ध्रुवम् ॥ २ ॥

महात्मोवाच ।

सत्यं यदुक्तं भवता नूनमेवं भविष्यति ।

राष्ट्रधर्मस्तु नैतेन लोपं गच्छेत्कदाचन ॥ ३ ॥
मरणे गतभीर्लोको व्यथितो राजशासनात् ।
स पुनर्मुक्तये यत्नं निश्चयेन करिष्यति ॥ ४ ॥
एवं प्रवर्तितं राष्ट्रधर्मचक्रं सुखाय नः ।
अन्ते सिद्धिकरं पश्य लोकस्यापि हिताय च ॥ ५ ॥

भारतीय उवाच ।

महात्मन्राष्ट्रधर्मोऽयं किंरूपः किंपरायणः ।
अधिकार्यत्र को वा स्यात्किं मूलं चास्य मे वद ॥ ६ ॥

महात्मोवाच ।

हन्त ते कथयिष्यामि महांश्चायमुपक्रमः ।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥ ७ ॥
प्रणीतः सर्वराष्ट्रेषु ऋषिभिस्तैः पुरातनैः ।
जितानामवबोधाय जेतॄणां प्रशमाय च ॥ ८ ॥
रूपे कालवशाद्भेदः किं तु मूलं सदा स्थिरम् ।
यस्य राष्ट्रे परा बुद्धिस्तेनाभ्यस्योऽयमादरात् ॥ ९ ॥
नेहातिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ १० ॥
यत्र जन्मास्य भवति यत्र संवर्धनं तथा ।
स्वकीया यत्र चैवास्य तस्य तद्राष्ट्रमुच्यते ॥ ११ ॥
यत्रास्य पितरावास्तां यत्रासंश्च पितामहाः ।
स्वीया परंपरा यत्र तस्य तद्राष्ट्रमुच्यते ॥ १२ ॥
विशेषतः सधर्माणो यत्र देशे वसन्ति हि ।
आचारेऽपि समानाश्च तस्य तद्राष्ट्रमुच्यते ॥ १३ ॥
न राष्ट्रं केवला भूमिर्न लोकोऽप्यथ वा क्वचित् ।
उभयोश्चिरसंबन्धे राष्ट्रमित्यभिधीयते ॥ १४ ॥

यथा माता तथा राष्ट्रं यथा सर्वेश्वरोऽपि वा ।
प्रेम्णादरेण सेव्याश्च धर्म एष सनातनः ॥ १५ ॥
राष्ट्रोद्धारे यत्नपरा राष्ट्रीयाः सर्व एव ते ।
तेन राष्ट्रस्य माहात्म्यं स्वयमेव प्रवर्धते ॥ १६ ॥
परकीयेषु राष्ट्रेषु कीर्तिं विस्तारयेत्स्वयम् ।
तेनेतरो जनो भीत आदरेण च तिष्ठति ॥ १७ ॥
कलहं वै स्वकीयेषु नैव कुर्यात्कदाचन ।
कलहो राष्ट्रनाशाय भवतीति सुनिश्चितम् ॥ १८ ॥
राष्ट्रच्छिद्रं हि कलहो मूले तं प्रशमं नयेत् ।
परकीयानि राष्ट्राणि छिद्राण्यन्वेषयन्ति हि ॥ १९ ॥
परकीयाँ भेदनीतिमवलम्ब्य चिरस्य वै ।
कलहं कारणं कृत्वा अस्मासु जयमाप्नुवन् ॥ २० ॥
अस्मदीयाः परानेव साहाय्यं कर्तुमुद्यताः ।
स्वकीयानां विनाशार्थं दुश्चेष्टितमिदं विधेः ॥ २१ ॥

भारतीय उवाच ।

भेदोऽस्मासु कथं जातः कदा वा केन वा कृतः ।
येन विस्तीर्णमेतद्धि राष्ट्रं परवशं गतम् ॥ २२ ॥
परकीयाः कुतश्चैते राष्ट्रेऽस्मिन्नागताः पुरा ।
न केनापि निरुद्धा वा आदावेव कथं वद ॥ २३ ॥

महात्मोवाच ।

कथां सुमहतीमेतामितिहासविदो विदुः ।
सारतस्तां तु वक्ष्यामि बोधाय भवतामिह ॥ २४ ॥
ऋषीणां वयमार्याणां वैदिकानां हि वंशजाः ।
हिन्दभूवासिनः सर्वे नानाधर्मरता अपि ॥ २५ ॥
आर्यसंघा वसन्नत्र राजानश्च तथा पृथक् ।

नेतारः संघशो ह्यासन्काले युद्धविशारदाः ॥ २६ ॥
जनेष्वासीत्सभा राजा तस्या अनुमते स्थितः ।
सा तस्य दुहिता सोऽपि प्रजापतिरिति श्रुतः ॥ २७ ॥
अवमत्य सभां यत्र राजा किंचित्करोति ह ।
तद्रतं दुहितर्येषा पुराणे विकृता कथा ॥ २८ ॥
मिथो विवदमानानां तेषामुद्धरणाय वै ।
शान्तिरूपस्तथा बुद्धः कालेनावततार ह ॥ २९ ॥
निर्वैरं सर्वतः कर्तुं लोके साम्यमथादिशत् ।
प्रवेशे नैव निर्बन्धस्तस्य संघेषु जातितः ॥ ३० ॥
दिवं याते ततस्तस्मिन्धर्मे शिथिलतां गते ।
यवनाः प्रादुरभवन्वायव्यां दिशि सर्वतः ॥ ३१ ॥
तानागतांस्तथा श्रुत्वा पौरवो योद्धुमुद्यतः ।
तक्षकाधिपतिस्त्वत्र सहायो यवनेष्वभूत् ॥ ३२ ॥
एवं स्ववैरिणो हन्तुं परकीयावलम्बनम् ।
कृतार्थता च दास्येऽपि स्वभावोऽयं पुरातनः ॥ ३३ ॥
अनेनैव हि मार्गेण लब्धद्वारा जिगीषवः ।
महंमदीयाः सेनान्यो राज्यं कर्तुमिहागताः ॥ ३४ ॥
स्वधर्मस्य प्रसारे ते सर्वेऽपि कृतबुद्धयः ।
शूराः क्रूरा मूर्तिपूजाविरोधे मतिधारिणः ॥ ३५ ॥
तैर्बलान्मूर्तयो भग्ना भारते शतशः पुरा ।
भ्रष्टं देवालयं सृष्टं स्वधर्मानुरतं जगत् ॥ ३६ ॥
राज्यासनं समाक्रान्तं विनायासेन भारते ।
महंमदीयमाहात्म्यं स्थापितं चानियन्त्रितम् ॥ ३७ ॥
निःसारितास्तेऽपि काले गते स्थानाच्छनैः शनैः ।
स्वातन्त्र्यार्थं पराक्रामन्शिवरायो यदा ह्यभूत् ॥ ३८ ॥

तत्रादावेव पाश्चात्यैः कैश्चिद्वैश्यैरिहागतम् ।
इतस्ततश्च राष्ट्रेऽस्मिन्स्ववृत्त्या वर्तितं किल ॥ ३९ ॥
शिवरायो महद्युद्धं कृत्वा निजजनैर्वृतः ।
महाराष्ट्रेषु राज्यं स स्थापयामास धीरधीः ॥ ४० ॥
तस्यानुयायिभिः पश्चादङ्गीकृत्य व्रतं पुनः ।
परकीया राजवृत्तिर्बहुधा विकलीकृता ॥ ४१ ॥
महाराष्ट्रीयेषु पुनर्यदा भेदो महानभूत् ।
तदा तच्छिद्रमन्येषां प्रवेशायाभवत्किल ॥ ४२ ॥
तमेव भेदमालम्ब्य निराकृत्य परांस्तथा ।
आंग्लैर्लब्धं स्थिरं स्थानं भारते स्वीयसौख्यदम् ॥ ४३ ॥
एवं सर्वान्पराजित्य युक्त्यैवेंग्लण्डवासिनः ।
शूराश्च नीतिकुशलाः संप्रत्यस्मान्प्रशासते ॥ ४४ ॥
भारतीय उवाच ।
येऽस्मान्दास्ये नियुज्यैव संक्षयाय सदोद्यताः ।
तेषामेव प्रशंसायां महात्मन्वचनं तव ॥ ४५ ॥
राष्ट्रधर्मस्य कथने न प्रशस्यमिदं प्रभो ।
एतेषामेव सेवायां राष्ट्रस्याभ्युदयोऽस्ति वा ॥ ४६ ॥
महात्मोवाच ।
वैरिणोऽपि गुणा ग्राह्या इति प्रोक्तं सतां मतम् ।
स्वराष्ट्रप्रीतिरांग्लानामतुला पश्य सर्वथा ॥ ४७ ॥
न कदापि परैर्ग्राह्या विश्वजेतार एव ते ।
पृथिव्यां वसतिस्तेषां सर्वदिक्षु यशस्विनी ॥ ४८ ॥
स्वराष्ट्रहितदक्षाणामेषां भीर्न कुतश्चन ।
अकुण्ठिता गतिस्तेषां जले खे भुवि सर्वथा ॥ ४९ ॥
परराष्ट्रप्रवेशेऽपि शनैराक्रमणेऽथ वा ।

कुशला व्यवहारज्ञा एषां तुल्यो न कश्चन ॥ ५० ॥
राष्ट्रकार्यपरा एते शूरा धूर्तास्तथैव च ।
वसतिर्यत्र चैतेषां तत्रस्थानां क्षयो ध्रुवः ॥ ५१ ॥
आविष्टा रजसा सर्वे स्वकीयानां सुखे रताः ।
कार्यसिद्धौ सुमधुराः पश्चादाशीविषोपमाः ॥ ५२ ॥
नैकोऽपि राष्ट्रघातार्थं स्वकीयानां प्रसज्जते ।
बहुभिर्देशकार्याय जीवितं तु तृणीकृतम् ॥ ५३ ॥
एते गुणाः परैर्ग्राह्या अस्माभिस्तु विशेषतः ।
अस्मासु भेदबुद्धिर्हि कार्यनाशे सदोद्यता ॥ ५४ ॥
एकधर्मेण संबद्धा जन्मभूम्यां विहारिणः ।
सर्वे वयं हिन्दपुत्राः संभूयैव यतामहे ॥ ५५ ॥
महंमदीयाः खिस्ताश्च येऽन्येऽप्यत्र चिरात्स्थिताः ।
तेऽस्माकं बान्धवा एव इति या सुदृढा मतिः ॥ ५६ ॥
सा धार्या हृदि वृत्तिश्च बाह्यतोऽपि तथैव च ।
तयैव कार्यं सिध्येत राष्ट्रस्य महदीदृशम् ॥ ५७ ॥
समदुःखसुखाः सर्वे हिन्दभूम्यां समादराः ।
भेदं सर्वं समुत्सृज्य राष्ट्रोद्धारे कृतोद्यमाः ॥ ५८ ॥
इयं सा सात्त्विकी निष्ठा श्रेष्ठा पूज्यतमा मम ।
राष्ट्रं समुन्नयेदेषा सर्वैरप्याश्रिता यदि ॥ ५९ ॥

॥ इति श्रीगान्धीगीतायां पुरावृत्तयोगो नाम तृतीयोऽध्यायः ॥ ३ ॥

अथ चतुर्थोऽध्यायः

भारतीय उवाच ।
आंग्लानां राजसी निष्ठा त्वयैवादौ प्रशंसिता ।
पश्चात्सात्त्विकनिष्ठायामादरोऽयं प्रदर्शितः ॥ १ ॥
का श्रेयस्यत्र लोकानां तदेकं वद निश्चितम् ।
आंग्लान्यशस्विनो दृष्ट्वा बुद्धिर्मोहवशं गता ॥ २ ॥
कार्याकार्यविमूढानां सम्प्रथं नः समादिश ।
शिष्यास्ते हि वयं सर्वे प्रपन्नाञ्शाधि भो गुरो ॥ ३ ॥
महात्मोवाच ।
असंशयं महाबाहो दुर्वारो मोह एष ते ।
मनस्तत्रैव रमते वैभवं यत्र दृश्यते ॥ ४ ॥
दृष्ट्वा परेषां सुखसाधनानि
रम्याणि चान्यानि हि वैभवानि ।
तान्येव नित्यं मनसा विचिन्त्य
लोभातुरः क्लिश्यति जीव एषः ॥ ५ ॥
किं त्वियं राजसी तृष्णा नोपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ ६ ॥
एवं तमोनिविष्टानां राजसानामधोगतिम् ।
स्वयं ज्ञात्वा विवेकेन सत्त्वे न्यस्थेन्मतिं सदा ॥ ७ ॥
भारतीय उवाच ।
सात्त्विकी राजसी वृत्ती राष्ट्रीया तामसी तथा ।
ज्ञातव्या सा कथं ब्रूहि प्रसीद त्वं महामते ॥ ८ ॥
महात्मोवाच ।
यत्तद्भगवता प्रोक्तं गुणत्रयविभागशः ।
ज्ञानं तदेव सर्वत्र परीक्षायां प्रयुज्यते ॥ ९ ॥

गुणाः प्रकृतिजास्त्वेते मनसा कर्मणा तथा ।
वृद्धिं वा नाशमायान्ति यथा क्षेत्रं तथा फलम् ॥ १० ॥
भेदे सत्यपि सर्वत्र ज्ञात्वा लोकान्समासतः ।
अनुमीयेत राष्ट्रस्य वृत्तिः सद्भिर्विचारतः ॥ ११ ॥
लोकेऽपि तमसाविष्टे सात्त्विकाः स्युः क्वचित्क्वचित् ।
तथा हि सात्त्विके लोके तमः सत्प्रविलीयते ॥ १२ ॥
यदा लोकाः स्ववृत्तिस्था हृदयेऽपि दयालतः ।
पीडां कुर्वन्ति नान्येषां तदा सत्त्वं हि वृद्धिमत् ॥ १३ ॥
असंतोषस्तु लोकानां रजोगुणसमुद्भवः ।
शान्तिर्न देशे कस्यापि वृत्तिः सर्वत्र चञ्चला ॥ १४ ॥
आकाङ्क्षा विविधा लोभो विकारः कामसंभवः ।
एतन्मूलानि कर्माणि फलानि रजसो विदुः ॥ १५ ॥
अत्रापि लोककल्याणकरं प्रीतिविवर्धनम् ।
सुकृतं यद्भवेन्नृणां तस्य कीर्तिः फलं महत् ॥ १६ ॥
महान्ति राजकार्याणि लोककार्याण्यनेकशः ।
रजः समुद्भवान्येव सुखं तेषु न शाश्वतम् ॥ १७ ॥
मनःप्रसादो रजसि प्रवृद्धे नैव लभ्यते ।
सुखमात्यन्तिकं तस्मात्सात्त्विकं श्रेष्ठमेव च ॥ १८ ॥
अनाश्रित्य फलं कर्म क्रियते सात्त्विकेन वै ।
तत्रैव फलमन्विच्छन्राजसो दुःखमाप्नुयात् ॥ १९ ॥

भारतीय उवाच ।

अफलं कर्म नैवेह महात्मन्विद्यते क्वचित् ।
तत्कर्मणि फलायोगः केनोपायेन सिद्ध्यति ॥ २० ॥

महात्मोवाच ।

सात्त्विकीं वृत्तिमाश्रित्य सक्तिं कर्मफले त्यजेत् ।

कर्म कुर्वन्फलासक्तः कर्मयोगीति कथ्यते ॥ २१ ॥
न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसंमूढो निजकार्यैकतत्परः ॥ २२ ॥
राष्ट्रकार्यप्रणेतॄणामियं बुद्धिर्विशेषतः ।
अपेक्ष्यते यतस्तेषामनुवर्ती सदा जनः ॥ २३ ॥
यद्यल्पेनापि लाभेन हानिनाप्यथ वा मनः ।
तेषां विकृतिमायाति लोके तन्न हितावहम् ॥ २४ ॥
तस्माल्लोकाग्रणीनां हि सात्त्विकी वृत्तिरिष्यते ।
या रजस्तमसी लोकेऽप्यभिभूय हितं चरेत् ॥ २५ ॥
सर्वत्र सुलभा ह्यत्र रजसस्तामसी गतिः ।
येन तामसवृत्तीनां प्रभुत्वमुपजायते ॥ २६ ॥
लोके हि तमसाविष्टे न प्रकाशः कुतश्चन ।
नीतिर्धर्मश्च समता सुखं नष्टं क्षणादिव ॥ २७ ॥
पाशवीं वृत्तिमापन्नाः परस्परवधोद्यताः ।
क्षुद्रा लोका जगत्यस्मिन्प्रलयं कुर्युरेव ते ॥ २८ ॥
तान्सर्वास्ववशे कर्तुं प्रभवेत्सत्त्वमेव तु ।
तस्मात्सर्वप्रयत्नेन सात्त्विकीं वृत्तिमाश्रयेत् ॥ २९ ॥

॥ इति श्रीगान्धीगीतायां गुणत्रयविभागयोगो नाम चतुर्थोऽध्यायः ॥ ४ ॥

अथ पञ्चमोऽध्यायः ।

भारतीय उवाच ।

अशस्त्रः सात्त्विकीं वृत्तिमवलम्ब्य कथं पुनः ।
रजस्तमोनिविष्टानां प्रतिकुर्यात्कृतिं त्विह ॥ १ ॥

प्रतिक्रियायां क्रुद्धास्ते सशस्त्रस्तमसावृताः ।
सात्विकानप्रतीकारान्नाशयेयुश्च सर्वशः ॥ २ ॥

महात्मोवाच ।

सर्वत्र ह्यभया वृत्तिः सत्त्वस्य प्रथमं फलम् ।
देहपीडा बहुविधा मृत्युरेतं न भीषयेत् ॥ ३ ॥
मृत्युभीता हि बहवो कार्यात्प्रतिनिवृत्य च ।
आहिताय स्वकीयानां प्रभवन्त्यचिरादिव ॥ ४ ॥
जातस्य हि ध्रुवो नाश इति नैसर्गिकी स्थितिः ।
तस्मादपरिहार्येऽर्थे कस्माद्भीतिं समाश्रयेत् ॥ ५ ॥
मृतस्यापि पुनर्जन्म सृष्टिचक्रे नियोजितम् ।
तस्मान्मृत्युभयं त्यक्त्वा स्वकर्तव्ये मतिं कुरु ॥ ६ ॥
व्यक्तिशस्तामसः शक्त्या सात्विकं नाशयेत्क्वचित् ।
किं तु संघे[१०] समुद्भूता सत्त्वशक्तिर्बलीयसी ॥ ७ ॥
सत्त्वं नाम स्वकीयस्य सद्भावस्य हि जागृतिः ।
सा लोके बहुभिस्तात लक्षणैः संनिदर्श्यते ॥ ८ ॥
सत्त्वे बलं संभवति सत्त्वे शान्तिः प्रतिष्ठिता ।
कार्ये च नैष्ठिकी बुद्धिः सत्त्वेनैव प्रसिद्ध्यति ॥ ९ ॥
अहिंसा सात्त्विकी वृत्तिः क्रोधहीना च सर्वथा ।
तेजोयुक्तमिदं सर्वं सात्त्विकं परिचक्षते ॥ १० ॥
प्रतिकर्तुं समर्थोऽपि प्रतिकुर्यां न कुत्रचित् ।
इति या तैजसी वृत्तिः सा सात्त्विकगुणोदया ॥ ११ ॥
तेजोविहीने भावे तु दैन्यस्यैव प्रदर्शनम् ।
क्षुद्रस्य वाथ भीतस्य यथा कर्म सुदुर्बलम् ॥ १२ ॥

भारतीय उवाच ।

परदास्यप्रसक्तानां केन मार्गेण सात्त्विकी ।

इयं तु तैजसी वृत्तिर्लभ्येत पुरुषर्षभ ॥ १३ ॥

महात्मोवाच ।

वृत्तिहीना वयं नूनमधोगतिपराः सदा ।
सा पश्याभ्यासयोगेन शक्यावाप्तुमुपायतः ॥ १४ ॥
उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ १५ ॥
परदास्ये हि राष्ट्रस्य या हानिरुपजायते ।
तां स्वतश्च प्रयत्नेन दूरीकृत्य हितेप्सुभिः ॥ १६ ॥
स्वोद्धारे चोद्यमः कार्यः सततं लोकनेतृभिः ।
येन सा तैजसी वृतिर्लोके विस्तारिता भवेत् ॥ १७ ॥
यदा तु परकीयानां शासनं तापदायकम् ।
तदा तत्प्रतिकारेच्छा लोकेषु स्याद्बलीयसी ॥ १८ ॥
तामेव वृत्तिं संयम्य सत्त्वतेजोयुतामिह ।
करिष्यन्नग्रणीर्लोके सर्वमान्यो भविष्यति ॥ १९ ॥
एकीभूतं यदा राष्ट्रं स्वां वृत्तिमनुतिष्ठति ।
परकीया अपि तदा मानयिष्यन्ति तत्कृतिम् ॥ २० ॥

॥ इति श्रीगान्धीगीतायामैक्ययोगो नाम पञ्चमोऽध्यायः॥ ५ ॥

अथ षष्ठोऽध्यायः ।

भारतीय उवाच ।

वयमत्र स्थिताः सर्वे आंग्लानां राजशासने ।
तत्तेषां राज्ययन्त्रस्य रचना कीदृशी वद ॥ १ ॥

महात्मोवाच ।

न राजा राजवत्तत्र शासने प्रभवेत्कचित् ।

लोकच्छन्दानुसारेण राज्ययन्त्रं प्रवर्तते ॥ २ ॥
लोकैरेव कृतं सर्वं राज्ञः संमतिमर्हति ।
अन्यत्र प्रथितं राजकृतमित्यद्भुतं महत् ॥ ३ ॥
एतैः स्वहितमुद्दिश्य हिन्दभूः स्ववशेकृता ।
वैश्यवृत्त्या राजवृत्त्या ह्रियते च ततो धनम् ॥ ४ ॥
एतेषां राज्ययन्त्रेण जनाः संचूर्णिता इह ।
गतत्राणाः प्रतीक्षन्ते मरणं हतभागिनः ॥ ५ ॥
एतैः स्वदेशे राजानः संमर्द्य बहुशः पुरा ।
सर्वदा सर्वकार्येषु कृताः स्ववशवर्तिनः ॥ ६ ॥
स्वराष्ट्रहितमुद्दिश्य जीवितं यत्तृणीकृतम् ।
एतैर्न किंचिदकृतं यद्राष्ट्रे वर्धयेत्सुखम् ॥ ७ ॥
एवमेवेऽधुनास्मासु यथास्थानमवस्थिताः ।
न संचालयितुं शक्या दासभावगतैः क्वचित् ॥ ८ ॥
तस्माच्छासनमेतेषामवमत्येह सर्वशः ।
वयं प्रतिकृतौ सिद्धाः स्वत उद्धारमिच्छवः ॥ ९ ॥
एतेषु न प्रहर्तारो वयमेतैर्हता अपि ।
अन्यैर्बहुविधोपायैर्वयमाशास्महे जयम् ॥ १० ॥
आंग्लेष्वपि महाभागा उदाराः सन्ति केचन ।
ये यतन्तेऽनिशं राष्ट्रेऽप्यस्मत्सुखमभीप्सवः ॥ ११ ॥
भारते यद्राज्ययन्त्रं स्थापितं तन्न तद्वशे ।
विफला बहुशो यत्नास्तेषामुच्चलनेऽस्य हि ॥ १२ ॥
आंग्लदेशे लोकसभा महती कार्यकारिणी ।
सा एव भारतं शास्ति निजान्प्रेष्य प्रयत्नतः ॥ १३ ॥
मन्त्री तत्र नियुक्तश्च यन्निदेशेऽधिकारिणः ।
अत्रत्याः शासने युक्ताः कुशला राजकारणे ॥ १४ ॥

मन्त्रिणस्तत्र वचनं सदस्यैर्बहु मन्यते ।
सोऽधिकारिषु विश्वस्य निजकार्यं करोति ह ॥ १५ ॥
किं त्वत्र भारतीयानां प्रवेशो नास्ति मूलतः ।
येन सत्यं सदस्यानामियाच्छ्रुतिपथं खलु ॥ १६ ॥
सर्वेऽप्येते स्वदेशस्य हिते सक्ताश्च शासने ।
उपेक्षन्ते भारतानां दैन्यं क्षयकरं बहु ॥ १७ ॥
एतेषां करभारेण भारतं जर्जरीकृतम् ।
न तु कश्चिच्छृणोतीमामस्माकं दुःखदां कथाम् ॥ १८ ॥
सहिताः सैनिकास्तेषां बहुशो वधसाधनैः ।
भीषयन्तः सदास्मांस्ते हेलया प्रहसन्ति च ॥ १९ ॥
ज्ञानहीनं दयाहीनं राज्ययन्त्रमिदं महत् ।
आंग्लैः प्रवर्तितं यत्र चूर्णिता भारता जनाः ॥ २० ॥
स्वकीयानां सुखावाप्त्यै पीडयन्तीह नो भृशम् ।
दैन्यात्क्षयं यास्यमाना वयं पश्येम कां गतिम् ॥ २१ ॥
आमूलमिदमत्युग्रमस्मन्मरणकारणम् ।
राज्ययन्त्रं बलादांग्लैरत्र राष्ट्रे प्रवर्तितम् ॥ २२ ॥

॥ इति श्रीगान्धीगीतायां राज्ययन्त्रयोगो नाम षष्ठोऽध्यायः ॥ ६ ॥

अथ सप्तमोऽध्यायः ।

महात्मोवाच ।

तदीदृशं राज्ययन्त्रमस्माकं प्राणघातकम् ।
स्थापितं तैरिह स्वेषां क्षेमाय च सुखाय च ॥ १ ॥
स्वे स्वे स्थाने नियुक्ता हि सर्वेऽप्यत्राधिकारिणः ।
प्रवर्तन्ते स्वतोऽप्येवं भारतस्य विनाशने ॥ २ ॥

अनिच्छन्तोऽपि जानीहि बलादिव नियोजिताः ।
सदिच्छया धिष्ठितास्ते कर्तुं किमपि चाक्षमाः ॥ ३ ॥
यदा लोकसभायास्तु ध्वनिरेको भविष्यति ।
तदैवात्र प्रसिध्येरन्सुखाशा भारतैर्वृताः ॥ ४ ॥
शतशस्तु सदस्या वै सभायां पृथगास्थिताः ।
तेषामेकमतं त्वस्मिन्विषये दुष्करं किल ॥ ५ ॥
येव तैरिह लभ्यन्ते विपुलानि सुखानि तत् ।
राज्ययन्त्रं कथं नाम नाशयेयुः स्वतो हि ते ॥ ६ ॥
न कश्चिद्धि सुखार्थेषु स्वयमेव विरज्यते ।
अन्यत्र महतो लाभाद्भयाद्वा जीवितस्य च ॥ ७ ॥
तस्मादस्माभिरेवैतत्कर्तव्यं स्वहितोद्यतैः ।
यथा ते संप्रसीदेयुर्लज्जिताः स्वार्थहेतुना ॥ ८ ॥
राज्ययन्त्रस्य वैयर्थ्यमस्मत्सौख्यफलोदये ।
तस्मात्तस्य प्रचलने विरोधं कुर्महे वयम् ॥ ९ ॥
विरोधे प्रथमं तावद्बहिष्कारः प्रयुज्यते ।
देशे बहिष्कृतानां हि सर्वथा दुर्दशा भवेत् ॥ १० ॥
आंग्लाधिकारिणां सेवा कदाचिदपि मास्त्विह ।
राज्ययन्त्रप्रचलने साहाय्यं[13] नैव कुर्महे ॥ ११ ॥
गृहकार्येषु वा तेषां न स्थातव्यं कदाचन ।
तेषां राज्यमदो येन स्वयमेव प्रशाम्यति ॥ १२ ॥
अपेक्ष्यन्ते ह्यनुचराः सदा विभवशालिभिः ।
सेवया प्रीणयेयुर्ये पादसंवाहनादिभिः ॥ १३ ॥
परितोऽनुचरा यत्र विभवं तद्धि सौख्यदम् ।
सेवकानामभावे तु व्यर्थमैश्वर्यमेव तत् ॥ १४ ॥
स्वदेशे यो नरः क्षुद्रो वैभवं लभतेऽत्र सः ।

अत्रत्यैः सेवकैर्दक्षैर्युक्तः स्वैरं विचेष्टते ॥ १५ ॥
किं तु जीवनमेतेषां सेवायां विद्यते यदि ।
सेवाधर्मे परित्यक्ते कष्टं स्याद्देहपोषणम् ॥ १६ ॥
राजकार्यनियुक्ता ये भारतीया ह्यनल्पकाः ।
तेषां स्वभरणे चिन्ता निष्पद्येत विनाशिनी ॥ १७ ॥
राजवृत्तौ बहिष्कार एवं स्याद्यदि दुष्करः ।
[१४]आंग्लवस्तुषु संयोज्यः सोऽपि स्यात्फलदायकः ॥ १८ ॥
एतैर्वैश्यकलाभिज्ञैर्भारते स्थापितं किल ।
स्ववस्तूनां हि माहात्म्यं प्रियं तद्भवतीह नः ॥ १९ ॥
आंग्लं वस्त्रं तथा पात्रं सुदर्शं च मनोहरम् ।
धनं प्रभूतं नयति स्वदेशं यशसा सह ॥ २० ॥
भारतीयं च यद्वस्त्रं तदस्मभ्यं न रोचते ।
सर्वथा परतन्त्राः स्मः पश्येमां दुर्गतिं पराम् ॥ २१ ॥
ये ह्यस्मासु कलाभिज्ञा वेमकर्मणि पारगाः ।
यन्निर्मितानि वस्त्राणि प्रीणन्ति स्म पुरा नृपान् ॥ २२ ॥
नाशितास्ते वधोपायैस्तेषां नास्ति कथाधुना ।
इमामेव गतिं प्राप्ताः कलावन्तस्तथेतरे ॥ २३ ॥
परदेशोद्भवं किंचिन्न ग्राह्यं स्यात्कदाचन ।
इति या सुदृढा बुद्धिः सा बहिष्कारसिद्धिदा ॥ २४ ॥
यन्त्राणि विविधानीह सुलाभोत्पादकानि च ।
निर्मितानि हि शास्त्रज्ञैरांग्लैरुद्यमशीलिभिः ॥ २५ ॥
येनाल्पकाले सिध्यन्ति वस्तूनि च सहस्रशः ।
स्वल्पमूल्यानि चैतांसि हरन्ति प्रसभं नृणाम् ॥ २६ ॥
तदिदं मोहनं सर्वमस्मासु विनिपातितम् ।
येन मूढा वयं सर्वे तिष्ठामस्तद्वशे सदा ॥ २७ ॥

मोहस्यावरणं तस्मान्निराकृत्य विवेकिभिः ।
बहिष्कारव्रतमिदं स्वीकर्तव्यं हितावहम् ॥ २८ ॥
बहिष्कारे यथा हानिः परेषां जायते ध्रुवा ।
तथा लाभः स्वकीयानां सहजः स्यादनेकधा ॥ २९ ॥
कृषिप्रधाने देशेऽस्मिञ्जातो लोकः सुदुर्बलः ।
न चैषां जीवनोपायो दृश्यते यत्नतोऽपि हि ॥ ३० ॥
एतैः कार्पासवस्त्राणि निर्मितानि निरालसैः ।
उदरंभरणार्थाय प्रभवेयुः सुखाय च ॥ ३१ ॥
स्वस्थानसुलभश्चायं लोकैः कार्यः समुद्यमः ।
साहाय्यं जीवने चैषां भविष्यति न संशयः ॥ ३२ ॥
विगुणं वा विरूपं वा कर्कशं वापि भारत ।
यत्किंचिद्भारते जातं तत्स्वीकार्यं च नेतरत् ॥ ३३ ॥
स्वकीये प्रीतिरतुला विरक्तिः परवस्तुषु ।
नराणामेष सामान्यो धर्मोऽस्माभिर्न लक्षितः ॥ ३४ ॥
बाह्यदर्शनसंमूढैः परवस्तुनि दर्शितः ।
आदरस्तेन संजाता हानिरस्माकमीदृशी ॥ ३५ ॥
अत्रैव निर्मितैर्वस्त्रैः स्वकीयतनुरक्षणम् ।
तथान्यव्यवहारेषु स्वीकारश्च स्ववस्तुनः ॥ ३६ ॥
एवे कृते पूर्णतया बहिष्कारः प्रसिध्यति ।
येनांग्लानां वैश्यवृत्तौ विरोधः स्यात्फलप्रदः ॥ ३७ ॥
लोकपालाः सदस्यास्ते तत्र लोकसभागताः ।
तेनास्मद्बन्धमोक्षाय कुर्युर्यत्नमतान्द्रिताः ॥ ३८ ॥
॥ इति श्रीगान्धीगीतायां बहिष्कारयोगो नाम
सप्तमोऽध्यायः ॥ ७ ॥

अथ अष्टमोऽध्यायः ।

महात्मोवाच ।

अथान्यत्संप्रवक्ष्यामि फलं यत्पारतन्त्र्यजम् ।
तीक्ष्णं विषमयं येन जीवितं भारते कृतम् ॥ १ ॥
श्रेष्ठानुकरणे वृत्तिर्नराणां हितमावहेत् ।
यच्छ्रैष्ठ्यविषयं त्वेषां तत्स्यादनुकृतं यदि ॥ २ ॥
बहुधैषा प्रवृत्तिस्तु क्षुद्रानुकरणे रता ।
श्रेष्ठेष्वपि च यद्धीनं तदनुक्रियते जनैः ॥ ३ ॥
तेन हीनत्वमेवैषामधिकं दृश्यते स्फुटम् ।
तदेव बहु मन्वाना न जानन्ति परं हितम् ॥ ४ ॥
विशेषतो यदा राज्यकर्तारः परदेशजाः ।
आचारवेषानुकृतिर्लोके तेषां स्वतो भवेत् ॥ ५ ॥
अहो नु दुर्गतिस्त्वेषा यच्छौर्यादिगुणास्तथा ।
न स्वीक्रियन्ते प्रजया पारतन्त्र्यवशस्थया ॥ ६ ॥
तेनाधोऽधो गतिश्चासां प्रजानां निश्चिता मता ।
परेषां त्विष्टमेवेदं येन तेषां स्थिरं पदम् ॥ ७ ॥
राज्ये महंमदीयानां हिन्दुभिस्तद्वशंगतैः ।
वेषस्तेषां स्वीकृतश्च भ्रष्टा भाषापि सर्वथा ॥ ८ ॥
तथैव तेषां देवेषु भक्तिरेभिः पुरस्कृता ।
येन हीनतमं दास्यमस्मदीयेषु संगतम् ॥ ९ ॥
शौर्यं तु भारतीयानामासीदेव समुज्ज्वलम् ।
तेनानुकूल्यं लब्ध्वा ते स्वातन्त्र्यं समवाप्नुवन् ॥ १० ॥
विस्तीर्णा भारती भूमिः परकीयैः सहस्रशः ।
आक्रान्तापि न तत्रासीदैक्यं शास्तृषु यत्नतः ॥ ११ ॥
दिल्लीश्वरेणास्पर्धन्त दाक्षिणात्याः शहादयः ।

तथैव वङ्गदेशेऽपि सम्राट्दण्डः पराकृतः ॥ १२ ॥
तेन लब्धप्रवेशास्ते भारतीयाः पृथक् पृथक् ।
राज्यकर्तॄन्पराभूय दिल्लीपतिममर्दयन् ॥ १३ ॥
भारतीयेष्वपि पुनश्छिद्राण्यन्विष्य यत्नतः ।
यदा त्वांग्लैः पराक्रान्तं चतुरैः सर्वतोदिशम् ॥ १४ ॥
तदाप्रभृति दास्यं वै देशे सर्वत्र दृश्यते ।
एकतन्त्रं राज्ययन्त्रं सर्वथास्मान्प्रबाधते ॥ १५ ॥
अत्रानुकरणे वृत्तिरधिकैवाधमाधुना ।
तेनेदमांग्लमाहात्म्यं गृहाद्गृहमगीयत ॥ १६ ॥
" अहो नु राज्यकर्तॄणां कर्तृत्वं गौरवस्तथा ।
धन्या वयं यदेतेषां दास्यकार्ये नियोजिताः ॥ १७ ॥
वेषो विचारः सुकृतः शस्त्रे शास्त्रे मतिर्दृढा ।
सर्वथा परमेशेन नियुक्ता हितकारिणः ॥ १८ ॥
मुक्तकण्ठमिदं स्तोत्रमांग्लानां हितवर्धनम् ।
भारतीयैर्गीयमानं कथं तैः स्यान्न सत्कृतम् ॥ १९ ॥
आंग्लानुकरणे सक्ता वयं हास्याः परैः सदा ।
स्वहानिं नैव जानीमः स्वार्थहीना दरिद्रिताः ॥ २० ॥
आंग्लदेशोद्भवानीह वस्त्रपात्राण्यनेकशः ।
क्रीत्वा वयं कृतार्थाश्च विहरामो यथासुखम् ॥ २१ ॥
आहारोऽपि यथा तेषां तथास्माभिः प्रशस्यते ।
सेव्यते बहुमानेन किमु मौर्ख्यमतः परम् ॥ २२ ॥
भारतीयं च यत्किंचित्सर्वथा हीनमेव तत् ।
पुण्यं यशस्यमायुष्यमांग्लदेशीयमेव च ॥ २३ ॥
आंग्ला हि वणिजः सर्वे राजनीतिविशारदाः ।
एतैः स्वकीयलाभश्च साधितो बहुशः किल ॥ २४ ॥

अधिकारिपदस्थानां माहात्म्यं गीयते सदा ।
येनानुकरणे तेषां स्वयमेव मतिः स्फुरेत् ॥ २५ ॥
तथापि वैश्यवृत्तिस्थैर्मोहयित्वा स्ववस्तुभिः ।
ह्रियते विपुला संपदचिरान्मनसा सह ॥ २६ ॥
धर्माचार्याः पुनस्तेषामत्रागत्य नवं नवम् ।
मधुरं ख्रिस्तमाहात्म्यमज्ञेषूपदिशन्ति च ॥ २७ ॥
लोकाः स्वधर्मतत्त्वेषु विमूढास्तैर्मनोहरैः ।
वचोभिः सर्वथाकृष्टा धर्मान्तरमुपासते ॥ २८ ॥
एवं च यत्र क्षुद्रत्वं स्वकीयं स्यात्प्रदर्शितम् ।
तत्रानुकरणं पश्य सेवितं चांग्लभावजम् ॥ २९ ॥
राज्यसंपादने त्वेषां कौशलं शौर्यमेव च ।
स्वाभिमानो निरुपमः प्रीतिर्देशे स्वके तथा ॥ ३० ॥
सर्वत्र चाभया वृत्तिर्गमनं संकटेष्वपि ।
वशीकरणचातुर्यमेते चान्ये हि सद्गुणाः ॥ ३१ ॥
ये तेषामिह माहात्म्यं वर्धयन्ति सदा भुवि ।
ते नानुलक्षिता लोकैराश्चर्यं महदीदृशम् ॥ ३२ ॥
महान्विशेषोऽप्येतेषु पश्यान्यो नैव लक्षितः ।
यस्मिन्ननुकृतेऽस्माकमतुलं स्याद्धितं कृतम् ॥ ३३ ॥
देशे हि बहवः पक्षा राजकीयमते स्थिताः ।
येषां मिथो विवादश्च श्रूयते राष्ट्रशासने ॥ ३४ ॥
नव्याननुपकुर्वन्तः पुराणमतवादिनः ।
समतावादिनश्चान्ये श्रीमतां च विरोधिनः ॥ ३५ ॥
एवं सति च भेदेऽपि यदा किंचिद्धितावहम् ।
समस्तानामुदीर्येत तदा सर्वे मिलन्ति वै ॥ ३६ ॥
सर्वे मिलित्वा तिष्ठन्ति राष्ट्रकार्यचिकीर्षवः ।

मिथो विरोधं संत्यक्त्वा पश्यांग्लाः स्वाभिमानिनः ॥ ३७
अत्रापि स्मर्यतेऽस्माकमितिहासः पुरातनः ।
येनैक्यं सुविरोधेऽपि स्वीकर्तव्यं समंजसैः ॥ ३८ ॥
[१५]घोषयात्राप्रसंगेन पुरा राजा सुयोधनः ।
गन्धर्वैस्ताडितो बद्धो पराक्रम्य जयेषुभिः ॥ ३९ ॥
श्रुतमेतद्यदा सर्वं पाण्डवैर्वनवासिभिः ।
तदा कृतं न्याय्यमेतदिति भीमेन भाषितम् ॥ ४० ॥
किं तु [१६]राजाजातशत्रुर्विषादमगमत्परम् ।
प्रोत्साहयन्स्वभ्रातॄंश्च रिपूणां दमने तदा ॥ ४१ ॥
युधिष्ठिरस्य तद्वाक्यमवधार्यं सदा नरैः ।
विशेषतो भेदशीलैरस्माभिर्हिन्दवासिभिः ॥ ४२ ॥
"परस्परविरोधेषु वयं पञ्चैव ते शतम् ।
परैः परिभवे प्राप्ते वयं पञ्चाधिकं शतम् ॥ ४३ ॥"
आंग्लवृत्तेषु यत्तत्त्वं तदेवात्र निदर्शितम् ।
सर्वैः संभूय राष्ट्रेषु कर्तव्यं हितमात्मनः ॥ ४४ ॥
अस्मद्देशे बहुविधा धर्माचाराः पुरातनाः ।
तत्राप्यनेकजातीयाः कालमानेन चागताः ॥ ४५ ॥
तथैव विस्तृता भूमिस्तेनैक्यं बहुदुष्करम् ।
तथापि हिन्दवार्सीया जनाः सर्वेऽपि बान्धवाः ॥ ४६ ॥
कलहो यद्यपि मिथो यदा स्याद्राष्ट्रसंकटम् ।
तदा सर्वैः संघशक्त्या हर्तव्यं तत्प्रयत्नतः ॥ ४७ ॥
महंमदीयाः ख्रिस्ताश्च ये चान्ये हिन्दवासिनः ।
समागच्छन्ति चेत्सर्वे तद्राष्ट्रस्य हितं भवेत् ॥ ४८ ॥
राष्ट्रकार्यार्थमैक्यं हि सर्वेषां सुखदायकम् ।
आंग्लानुकरणे सक्तैः प्रथमं ग्राह्यमेव तत् ॥ ४९ ॥

तथा च निर्भया वृत्तिर्नैश्चयो दृढ आत्मनः ।
शौर्यं चातुर्यमेवानुकरणीयं हिताय यत् ॥ ५० ॥
एवं समुदितेष्वेषु गुणेष्वस्मासु भारत ।
न चिरादेव राष्ट्रस्य जायेताभ्युदयः पुनः ॥ ५१ ॥

॥ इति श्रीगान्धीगीतायामनुकरणयोगो नाम
अष्टमोऽध्यायः ॥ ८ ॥

अथ नवमोऽध्यायः ।

भारतीय उवाच ।

अत्र येऽप्यांग्लसेवायां नियुक्ता हिन्दवासिनः ।
तेषां महान्विरोधोऽयमस्मत्कार्येषु दृश्यते ॥ १ ॥
स्वदेशभक्तिर्हृदये कथं तेषां न वर्तते ।
हितकार्येषु घाताय सर्वथा प्रभवन्ति ते ॥ २ ॥
येन हानिः परास्माकं स्फुटा सर्वत्र दृश्यते ।
तस्यैव राज्ययन्त्रस्य रक्षणाय सदोद्यताः ॥ ३ ॥
स्वकीयानां वधे चैषां प्रचलेद्धि करः कथम् ।
मनोभूमिर्विचित्रेयं दासानां यत्प्रतीयते ॥ ४ ॥
अपेक्ष्यते दया यत्र ममत्वं स्वोदितं तथा ।
तत्रैव वैरं काठिन्यं वर्तते इति दुर्धरम् ॥ ५ ॥

महात्मोवाच ।

बहूनामप्यनर्थानामेकमेवात्र कारणम् ।
यत्स्वीकृता बतास्माभिः परसेवा विघातिनी ॥ ६ ॥
अस्यां हि परसेवायामुदारा बहुशो गुणाः ।
नश्यन्ति पश्यतामेव मुग्धं च जगदीदृशम् ॥ ७ ॥

सेवायां बहुमन्वानो नानहानिं न पश्यति ।
स्वस्वामिनो मते तिष्ठंस्तदादेशं करोति च ॥ ८ ॥
सेवा हीनतमा लोके शूद्रकर्मेति कीर्तिता ।
राजपूर्वा च सा तत्र लोकेषु बहु मन्यते ॥ ९ ॥
ब्राह्मणक्षत्रियविशां सेवाधर्मो हि गर्हितः ।
स्पर्धन्ते त्वद्य ते सर्वे राजकर्मसु भारत ॥ १० ॥
स्ववृत्तिस्थाः पुरा सर्वे ब्राह्मणा वेदपारगाः ।
निरीहाश्च स्वतन्त्राश्च बह्वमन्यन्त राजभिः ॥ ११ ॥
तैरेव धनलोभेन दास्यं स्वीकृतमीदृशम् ।
त्यक्त्वा लोकधुरीणत्वमपहाय च गौरवम् ॥ १२ ॥
राज्ञः प्रसादमीप्सद्भिस्तच्चैवमेतत्प्रकीर्तितम् ।
लोके राजमतं ग्राह्यं नाविष्णुः पृथिवीपतिः ॥ १३ ॥
तेनोन्मत्तेष्वपि जनो न विरोधपरः क्वचित् ।
राजा प्रभुर्लोकधाता इति मत्वा न निन्द्यते ॥ १४ ॥
परकीयैर्यदा भूमिरियं स्ववशगा कृता ।
तदापीमां पुरस्कृत्य वृत्तिं लोकेन वर्तितम् ॥ १५ ॥
माहात्म्यं राजसेवायाः पश्यैवं वर्धितं क्रमात् ।
इदानीं राष्ट्रकार्येषु तदेवास्मान्प्रबाधते ॥ १६ ॥
वस्तुतो राजशब्दस्य वैयर्थ्यं चांग्लपद्धतौ ।
राज्यस्य शासने राज्ञः स्वातन्त्र्यं नैव विद्यते ॥ १७ ॥
यथा लोकसभा शास्ति नियुक्ता वापि मन्त्रिणः ।
तथैव क्रियते राष्ट्रे निमित्तं राजनाम तु ॥ १८ ॥
अस्मासु राजनिष्ठाया माहात्म्यं तु पुरातनम् ।
येनेदं राज्ययन्त्रं वै राजेति बत पूज्यते ॥ १९ ॥
रक्षकाद्यङ्गलोकेषु स्वस्वस्थानाभिमानिषु ।

इयं वृत्तिर्विशेषेण दृश्यते कार्यघातिनी ॥ २० ॥
स्वकीयानां निरोधे च तेषां दण्डः सदोद्यतः ।
स्वामिना यत्समादिष्टमविचार्यैव तत्क्रिया ॥ २१ ॥
स्वदेशे च स्वकीयेषु प्रीतिस्तेषामपीष्यते ।
यद्राष्ट्रस्याहितं स्पष्टं कार्यं तन्नैव तैरपि ॥ २२ ॥
सेवायां बहवो दोषा बन्धजाः संभवन्ति वै ।
तत्रापि बुद्धिः कल्याणी स्याच्चेद्दुःखाय नो भवेत् ॥ २३ ॥
तावत्सेवा प्रकर्तव्या यावद्राष्ट्राविरोधिनी ।
विरोधे समनुप्राप्ते त्याज्या सैव प्रयत्नतः ॥ २४ ॥
लोकेऽस्मिन्यतमानेन कर्तव्यं स्वात्मनो हितम् ।
तदप्यविगणय्यैव बान्धवेषु समाचरेत् ॥ २५ ॥
कुटुम्बं बान्धवा देशः स्वकीयश्च तथाग्रतः ।
एषा परंपरा धार्या उत्तरोत्तरवाहिनी ॥ २६ ॥
॥ इति श्रीगान्धीगीतायां सेवाधर्मयोगो नाम नवमोऽध्यायः ॥ ९ ॥

अथ दशमोऽध्यायः ।

महात्मोवाच ।

अथेदानीं प्रवक्ष्यामि राष्ट्रधर्मं समुज्ज्वलम् ।
पालनीयः प्रयत्नेन स सर्वैरुदयोन्मुखैः ॥ १ ॥
यत्र तेजोमयं किंचिद्राष्ट्रे संप्रतिदृश्यते ।
सत्यं धर्मस्य तद्बीजं रक्षणीयं प्रयत्नतः ॥ २ ॥
यानि राष्ट्राणि लोकेऽस्मिन्दृश्यन्ते ऋद्धिमन्ति च ।
तत्र मूलं विजानीहि राष्ट्रधर्मस्य पालनम् ॥ ३ ॥

व्यक्तिधर्माज्जातिधर्मो राष्ट्रधर्मस्ततो महान् ।
माहात्म्यं तारतम्येन जानाति स्वकृतौ सुधीः ॥ ४ ॥
ब्राह्मणक्षत्रियविशः शूद्राश्चैवापि भारत ।
चत्वार एव ते वर्णाः सदा राष्ट्रे सुनिश्चिताः ॥ ५ ॥
चातुर्वर्ण्यमिदं पश्य गुणकर्मविभागशः ।
निश्चीयते सदा सूज्ञैर्जन्म नैवात्र कारणम् ॥ ६ ॥
निरीहा लोककल्याणे स्वयंस्फूर्तिस्तथोज्ज्वला ।
त्यागवृत्तिः श्रेष्ठतमा यत्र तं ब्राह्मणं विदुः ॥ ७ ॥
सत्त्वस्य यत्र चोत्कर्षो निर्भयत्वममानिता ।
भोगेष्वसक्तिः स सदा वन्द्यो ब्राह्मणसत्तमः ॥ ८ ॥
आविर्भावश्च रजसः क्षत्रिये संप्रदृश्यते ।
तत्रापि सत्त्वमूलेयं वृत्तिः सम्यक्प्रतीयते ॥ ९ ॥
प्रतिकारोऽन्यायकृतेर्दण्डः पारुष्यमेव च ।
प्रयुज्यते क्षत्रियेण तदेवास्य विशेषणम् ॥ १० ॥
दीयते यत्प्रमाणेन तदाधिक्येन गृह्यते ।
वैश्यवृत्तिरियं पश्य लोके स्याद्व्यावहारिकी ॥ ११ ॥
तेन राष्ट्रे हि वस्तूनां क्रयो विक्रय एव च ।
उत्पादनं चापि तथा वणिग्भिः क्रियते सदा ॥ १२ ॥
नैकोऽपि यत्र चैतेषां गुणोत्कर्षः प्रतीयते ।
सेवापरः स कार्येषु शूद्रः श्रेष्ठैर्नियुज्यते ॥ १३ ॥
सत्त्वस्य च प्रकर्षेण शूद्रो ब्राह्मणतामियात् ।
हीनवृत्तिप्रसंगेन ब्राह्मणस्याप्यधोगतिः ॥ १४ ॥
चातुर्वर्ण्यमिदं सिद्धं भारते जन्मतः पुरा ।
वृत्तिर्न लक्षणोपेता संकरस्तेन दुर्गमः ॥ १५ ॥
परदास्यवशादद्य बहवः शूद्रतां गताः ।

तथापि वर्णमाहात्म्यं गीयते चोपयुज्यते ॥ १६ ॥
वर्णाचारो यदा लोके भक्त्यासीत्पालितः पुरा ।
तदा परंपरायत्तः स सर्वैः शिरसा कृतः ॥ १७ ॥
पित्रोपदिष्टो धर्मो हि पश्चात्पुत्रेण पाल्यते ।
नियमातिक्रमो येन नासीदृष्टः कदाचन ॥ १८ ॥
सा कालवशतो भ्रष्टा व्यवस्था लौकिकी क्रमात् ।
आचारे संकरस्तेन विचारेऽपि तथैव च ॥ १९ ॥
तेन स्ववर्णमाहात्म्यं स्खलितं नियमादिह ।
उच्चा नीचपदं प्राप्ताः कस्तान्संमानयिष्यति ॥ २० ॥
दुराग्रहोऽयमेतेषां स्वाचारो यैर्न पालितः ।
तैर्वर्णवर्णनं लोके हास्यतां याति सर्वथा ॥ २१ ॥
तत्रापि मुद्रणकला विद्याविस्तारसाधिनी ।
आगता भारते तेन ज्ञानं सुलभतां गतम् ॥ २२ ॥
वर्तन्ते बहवो भेदा लोके देशान्तरेष्वपि ।
तथापि जन्मतो वर्णसिद्धिरत्रैव भारते ॥ २३ ॥
पुरातनोऽयमाचारो धर्मे विहित इत्यपि ।
रूढिप्राबल्यमेवेह मन्यते बहुधा जनैः ॥ २४ ॥
कालमानेन चाचारः सर्वथा शिथिलीकृतः ।
नवीनैः शिक्षितैस्तत्र विचारोऽपि नवो वृतः ॥ २५ ॥
स्वकीयभावना तेन नाशिता नैव वर्धिता ।
भेदे च कलहे चैतत्कारणं समुपस्थितम् ॥ २६ ॥
कोटिशश्चान्त्यजातीया अस्पृश्या इति धिक्कृताः ।
असंस्कृता बान्धवास्ते निमग्ना हीनकर्मसु ॥ २७ ॥
सेवमानैर्विधर्म्यान्नं स्पर्शमाहारमेव च ।
स्वकीया अपसार्यन्ते धिगेषा भारते स्थितिः ॥ २८ ॥

राष्ट्रधर्मे तु भेदानामवकाशो न विद्यते ।
यद्यद्भेदाय दुःखाय तद्धर्तव्यं प्रयत्नतः ॥ २९ ॥
समाना बान्धवाः सर्वे जन्मभूमिनिवासिनः ।
सामान्यधर्मो यस्तेषां स राष्ट्रे प्रथमः स्मृतः ॥ ३० ॥
व्यक्तिधर्मेऽपि सहसा यन्न राष्ट्रहितावहम् ।
तत्त्याज्यं मनसा सम्यग्विचार्य मनुजेन च ॥ ३१ ॥
शान्तिः समृद्धिः स्वीयेषु राष्ट्रे स्याद्येन मङ्गलम् ।
तदेव व्यक्तिस्वातन्त्र्यं मनुजानां सुखं वहेत् ॥ ३२ ॥
तस्मात्सर्वैर्नाशयित्वा भेदं साध्यं दुरासदम् ।
सुखं राष्ट्रस्य यत्नेन तद्धर्मस्य महत्फलम् ॥ ३३ ॥
उपेक्षा नैव कर्तव्या राष्ट्रे शत्रोरणोरपि ।
नो चेत्स प्रबलो भूत्वा कालेन व्यथयेज्जनान् ॥ ३४ ॥
यः स्वार्थवशगो भूत्वा शत्रुपक्षं परामृशेत् ।
स सर्वैरपि हन्तव्यः शत्रुणा सह यत्नतः ॥ ३५ ॥
प्रत्यहं चिन्तयित्वैव उपायान्राष्ट्रवर्धनान् ।
सर्वैः संभूय कर्तव्यः सदोद्योगस्तया दिशा ॥ ३६ ॥
अत्रापि लोकनेतारः सुबुद्धाः कार्यतत्पराः ।
न कैश्चिदवमन्तव्या मान्याः सर्वैः सदोद्यतैः ॥ ३७ ॥
लोकाग्रणीषु ये नाम स्वार्थमुद्दिश्य केवलम् ।
यतन्ते तेऽचिरादेव हास्यतां यान्ति सर्वतः ॥ ३८ ॥
विस्मृतं येन सर्वं स्वं लोककार्यरतेन हि ।
ममत्वं यस्य वै राष्ट्रे स सर्वैरपि पूज्यते ॥ ३९ ॥
स आचार्यो राष्ट्रधर्मे उपदेष्टा सुखस्य च ।
अनुसृत्य हितं लोकः श्रेयसा प्रतिपद्यते ॥ ४० ॥
संघशक्तिर्हितकरी राष्ट्रे सैव सदेष्यते ।

सर्वेषां यत्र चैक्यं स्यात्तत्कार्यं पश्य सिध्यति ॥ ४१ ॥
भेदः कलहकारी च घाताय सहसा नृणाम् ।
प्रयत्नेनापहर्तव्यः स स्वकीयेषु नेतृभिः ॥ ४२ ॥
आचारे च विचारे च स्वकीयानां हितं सदा ।
यः साधयेद्यथाशक्त्या स राष्ट्रीय इति स्मृतः ॥ ४३ ॥
परदास्यावसक्तानां लोकानां राष्ट्रभावना ।
यदि जागर्त्यविरता सुलभं स्यात्ततो हितम् ॥ ४४ ॥
ये नाम राज्यकर्तारः परकीयाः समागताः ।
सर्वथा प्रतिकार्यास्ते लोकैः स्वातन्त्र्यचिन्तकैः ॥ ४५ ॥
तत्र पीडा बहुविधा कारागृहनिबन्धनम् ।
मरणं यतमानानामापतेद्राजदण्डतः ॥ ४६ ॥
तथापि न प्रविचलेन्निश्चयाद्धर्मतो नरः ।
धर्मे धैर्यं धृतवतां कार्यमुन्नतिकारकम् ॥ ४७ ॥
एष ते सारतः प्रोक्तो राष्ट्रधर्मः सनातनः ।
पावनः सर्वलोकानां पालनीयः सदा नृभिः ॥ ४८ ॥
इमं धर्ममुपाश्रित्य राष्ट्रैरन्यैरपि स्वकम् ।
साधितं पश्य कल्याणं नोपकुर्यात्कथं स नः ॥ ४९ ॥
गृहभूषणभूताभिरबलाभिरपीह नः ।
महत्कार्यं च कर्तव्यं राष्ट्रधर्मानुपालने ॥ ५० ॥
यथार्थदर्शिनी लोके पुरुषस्य प्रियः सुहृत् ।
अबला बलदात्री सा जीवने सुखकारिणी ॥ ५१ ॥
बाल्ये माता पालयति भगिनी च प्रिये स्थिता ।
सर्वसौख्यं ददातीह यौवने सहचारिणी ॥ ५२ ॥
स्त्रियो नेष्यन्ति पुरुषान्स्त्रियो राष्ट्रस्य दीप्तयः ।
राष्ट्रधर्मस्य माहात्म्यं स्त्रियः संवर्धयन्ति हि ॥ ५३ ॥

प्रेम्णा मृदुवचोभिश्च नरस्तासां वशोऽनुगः ।
कार्यः सत्पथगामी स ताभिरेवाचिरादिह ॥ ५४ ॥
मुमुक्षवो वयं सर्वे कठिनाद्दास्यबन्धनात् ।
स्वातन्त्र्यं च स्वराज्यं च धर्मेणानेन चाप्नुमः ॥ ५५ ॥
॥ इति श्रीगान्धीगीतायां राष्ट्रधर्मयोगो नाम दशमोऽध्यायः ॥ १० ॥

अथ एकादशोऽध्याय ।

भारतीय उवाच ।

स्वराज्यमिति किंरूपं तन्नो वक्तुमिहार्हसि ।
विस्तरेण वयं ज्ञातुमिच्छामस्तत्त्वमस्य हि ॥ १ ॥

महात्मोवाच ।

साङ्गोपाङ्गं करिष्यामि स्वराज्यस्य विवेचनम् ।
येन संशयलेशोऽपि न विद्येत हृदि क्वचित् ॥ २ ॥
आदावांग्लाः पराक्रम्य वाणिज्यार्थमिहागताः ।
अस्मासु कलहं दृष्ट्वा मतिं राज्ये प्रचक्रिरे ॥ ३ ॥
स्वकीयं शासनं चात्र युक्त्या शक्येत भेदतः ।
एवं विचार्य ते दक्षाः कलहे पक्षपातिनः ॥ ४ ॥
वाणिज्यरक्षणार्थं वै सैनिका ये नियोजिताः ।
तेषामेव सहाय्येन आक्रान्तं पश्य भारतम् ॥ ५ ॥
युद्धकौशलमेतेषां तथा शस्त्रादिकं नवम् ।
बहुसंख्या भारतीया येन युद्धे पराजिताः ॥ ६ ॥
एकं साह्यं प्रकुर्वन्तो नाशयित्वा हि वैरिणम् ।
पश्चान्मित्रमपि घ्नन्ति नीतिरेषां बतेदृशी ॥ ७ ॥
यैश्च कालवशात्सर्वमाक्रान्तं भारतं परैः ।

तानेव बहु मन्वाना वयं तु सुखिनः स्थिताः ॥ ८ ॥
एतेषां शासनं पश्य बाह्यतः सुखदं परम् ।
अन्तःक्लेशकरं नृणां सर्वस्वापहरं महत् ॥ ९ ॥
स्वार्थसिद्धिसमुद्योगो लोके स्वाभाविकः किल ।
परार्थं त्वविरुध्यैव कृतः श्रेष्ठः स उच्यते ॥ १० ॥
यत्र वै परघातेन स्वार्थः सिध्यत्यभीप्सितः ।
सा हि हीनतमा रीतिर्निन्द्यते बहुधा जनैः ॥ ११ ॥
आंग्लैस्तु नीतिमेवैतामालम्ब्य यतितं बलात् ।
येनाचिरात्समाधानं नष्टं राष्ट्रे शुभोदयम् ॥ १२ ॥
ये शासने नियुक्तासु तेष्वेवासन्हि केचन ।
उदारा भारतीयानामुद्धारे ये कृतोद्यमाः ॥ १३ ॥
ईदृशो राजपुरुषो ह्यूमनामा महाशयः ।
यतमानो दयाशीलो हितार्थे हिन्दवासिनाम् ॥ १४ ॥
तेनैव मिलिता देशे शिक्षिताश्च सदुद्यमे ।
भारतीयाः प्रयत्नेन समितिर्निर्मिता शुभा ॥ १५ ॥
यत्र वै बहुदेशीयाः समेता लोकनायकाः ।
पश्यन्ति विविधोपायान्यैः स्याद्राष्ट्रहितं किल ॥ १६ ॥
संभाविताः प्रथमतः कौतुकाद्राज्यकर्तृभिः ।
उत्तेजिता मानिताश्च सदस्या आदरात्तदा ॥ १७ ॥
यदा तु समितौ लोकैर्दूषिता राज्यपद्धतिः ।
तदा हेयतया सापि गणिता राजपूरुषैः ॥ १८ ॥
दया सहानुभूतिश्च लुप्ता चैवं क्रमेण ह ।
यदांग्लशासने दोषा दृष्टाः समितिनायकैः ॥ १९ ॥
राज्याधिकारे बहव आंग्ला आसन्नियोजिताः ।
येषां वेतनमुद्दिश्य व्यय आसीन्महत्तमः ॥ २० ॥

वाणिज्यं च स्वकीयानां पोषितं राज्यकारिभिः ।
कर्शिता हिन्दपुत्राश्च स्वोद्यमे दुर्बलाः कृताः ॥ २१ ॥
एवं दैन्यं समुद्भूतं राष्ट्रे सर्वत्र शाश्वतम् ।
तत्रोपायांश्चिन्तयन्ति धुरीणा लोकनायकाः ॥ २२ ॥
निर्धना भारतीया वै परायत्तं च शासनम् ।
शस्त्रहीनं शौर्यहीनं राष्ट्रं क्लिश्यति सर्वथा ॥ २३ ॥
अस्माभिरेवमानीता आपद्राष्ट्रविघातिनी ।
तन्नाशाय प्रयत्नेन वर्तितव्यं सदा जनैः ॥ २४ ॥
आंग्लशासनमुद्दिश्य यो विश्वासो महानभून् ।
स इदानीं समुद्भूतो दृष्ट्वा दैन्यं समन्ततः ॥ २५ ॥
अत्रान्तरे समुदितो विवेकानन्दनामकः ।
महात्मा वङ्गदेशीयो राष्ट्रोद्धारप्रवर्तकः ॥ २६ ॥
स्वयं सन्यस्तसर्वस्वस्तेजस्वी चांशुमानिव ।
ऐक्यभावं स्वाभिमानं स्वकीयेषु प्रसारयन् ॥ २७ ॥
येन देशान्तरं गत्वा स्थापितं सुमहद्यशः ।
कीर्तितं धर्ममाहात्म्यमखिलेषु सनातनम् ॥ २८ ॥
अज्ञानेनावृता लोका भारते बहुशः किल ।
तेनैतैः स्वहितोद्योगः क्रियते न कदाचन ॥ २९ ॥
ये सूज्ञा लोकनेतारस्तेऽपि स्वार्थपरायणाः ।
राष्ट्रस्याप्यहितं कृत्वा साधयन्ति स्वकं सुखम् ॥ ३० ॥
एषा ह्यवनतिर्लोके महती क्लेशकारिणी ।
तस्या नाशे समुद्योगः कृतस्तेन महात्मना ॥ ३१ ॥
तस्य यत्नेन लोकेषु चैक्यं राष्ट्रीयभावना ।
धर्मप्रीतिर्जागरिता ओजो वर्धयतीह या ॥ ३२ ॥
वङ्गीया युवकाः सर्वे विवेकानन्दमाश्रिताः ।

तेजस्वितां सदाचारं चाप्नुवन्हितसाधकम् ॥ ३३ ॥
राष्ट्रीयसमितिश्चापि कुर्वती लोकजागृतिम् ।
राज्यकर्तॄन्समुद्दिश्य प्रयत्नानकरोद्बहून् ॥ ३४ ॥
भारतीयहिते त्वांग्लहानिरित्यपि निश्चितम् ।
मत्वाधिकारिणस्तत्र विरोधं कुर्वते बहु ॥ ३५ ॥
" कृषिप्रधाने देशेऽस्मिञ्जनाः सर्वेऽप्यशिक्षिताः ।
लभन्ते शान्तिमतुलां समृद्धे चांग्लशासने ॥ ३६ ॥
तानन्यथा भासयन्तः केचित्स्वमतमानिनः ।
असुखं वर्तते लोके इति मिथ्या वदन्ति ते ॥ ३७ ॥
विश्वासो नैव कर्तव्यस्तेषां वाक्ये कदाचन ।
सर्वथा च विरोद्धव्याः स्वसिद्धा लोकनायकाः " ॥ ३८ ॥
इत्थं समितिनेतारः शासनस्थैर्लघूकृताः ।
नैवामुञ्चन्स्वयत्नांस्ते लोककार्यैकतत्पराः ॥ ३९ ॥
केचिदांग्ला उदाराश्च तेषामासन्सहाय्यकाः ।
यैः स्वदेश्येषु चलिता भारतीयकथा तदा ॥ ४० ॥
राष्ट्रस्य शासने तेन सूज्ञा भारतवासिनः ।
केचिन्नियोजिताश्चांग्लसभया हितकारिणः ॥ ४१ ॥
ये राजपुरुषा राष्ट्रे नियुक्ता लोकशासने।
तेषां मन्त्रोपदेशाय निर्मिता[७] समितिस्तथा ॥ ४२ ॥
एवं क्रमेण कुर्वाणा लोककल्याणवादिनः ।
तृप्तिं दातुं न शक्तास्ते लोकस्यांग्लाः कथंचन ॥ ४३ ॥
राज्याधिकारो हि महान्यावदांग्लेषु योजितः ।
का लोकसमितिस्तावद्यस्या जल्पो न मन्यते ॥ ४४ ॥
अत्रान्तरे भारतेषु [१]कर्षणः संनियोजितः ।
अवमत्य जनान्वङ्गभङ्गं स कृतवांस्तदा ॥ ४५ ॥

लोकानुरञ्जनं राजकर्तव्यमिति घोषणा[1] ।
महिष्या या कृता राष्ट्रे सा तेन विफलीकृता ॥ ४६ ॥
वङ्गीयाश्चैकदेशीया बलादेवं द्विधा कृताः ।
अन्यायस्यापकर्तुं ते सर्वेऽपि व्यदधुर्मतिम् ॥ ४७ ॥
समस्तं भारतं वर्ष प्रतिकारे समुद्यतम् ।
अशस्त्राणां हि ये मार्गास्ते सर्वैश्च समाश्रिताः ॥ ४८ ॥
तत्र केचित्समुद्भूतास्तामसाः क्रान्तिकारकाः[2] ।
यैरांग्लानां वधेनैव स्वातन्त्र्यं समभीप्सितम् ॥ ४९ ॥
असंतोषो महान् राष्ट्रे कर्षणस्यानयात्कृतः ।
बहवो लोकनेतारः कारागारे नियन्त्रिताः ॥ ५० ॥
तथापि संप्रचलिता लोके जागृतिरीदृशी ।
न निरुद्धा हठात्सा तु बभूवाथ समुत्कटा ॥ ५१ ॥
भारतीयेष्वपि तदा स्फुटा वाचः समीरिताः ।
मास्त्वस्मासु चिरं हीदं क्लेशदं दुष्टशासनम् ॥ ५२ ॥
आंग्लदेशेऽपि सा वार्ता प्रसृता क्षोभशंसिनी ।
निःसारितश्च स्वस्थानात्कर्षणो लोककर्षणः ॥ ५३ ॥
तदानीमेव लोकेषु स्वराज्यावाहनं कृतम् ।
समितौ[21] राष्ट्रभक्तानां दादाभाईमहात्मना ॥ ५४ ॥
स्वतन्त्रं च समृद्धं च सर्वलोकसुखावहम् ।
स्वकीयानां हि यद्राज्यं तत्स्वराज्यं प्रचक्षते ॥ ५५ ॥
विदेशीयबहिष्कारं व्रतं च परमोज्ज्वलम् ।
स्वराज्यप्राप्युपायोऽयं तदानीमेव निश्चितः ॥ ५६ ॥
एवं सद्व्रतमुद्दिश्य कार्यं लोकस्य शिक्षणम् ।
निर्भया येन लोकाः स्युः स्वहिते कृतबुद्धयः ॥ ५७ ॥
स्वराज्यं यद्भविष्यत्तत्किरूपं समभीप्सितम् ।

आंग्लानामेव साम्राज्ये जनः स्याद्वा सुखी न वा ॥ ५८ ॥
स्वायत्तं हिन्दराष्ट्रं स्यादविरोधेन तत्त्वतः ।
येनांग्लैः सहवर्तित्वं स्नेहभावेन सिध्यति ॥ ५९ ॥
एवंविधायां चर्चायां विवादः समजायत ।
येन लोकधुरीणेषु मतभेदोऽप्यदृश्यत ॥ ६० ॥
व्रतस्वीकरणे चापि समुत्साहो न तादृशः ।
भेदस्तेन समुद्भूतो राष्ट्रीयेष्वेव दुर्धरः ॥ ६१ ॥
आंग्लानां कृपया ह्येव राष्ट्रकल्याणमीप्सितम् ।
भविष्यतीति निश्चित्य विरोधस्तैर्न सौख्यदः ॥ ६२ ॥
मतमेतत्समाहृत्य आंग्लप्रीतिमभीप्सवः ।
यतन्ते विविधोपायैः केचिदाग्लाविरोधिनः[22] ॥ ६३ ॥
विरुद्धमविरुद्धं च केषांचिद्द्विविधं मतम्[23] ।
यत्र कार्यं न कृपया विरोधस्तत्र कार्यकृत् ॥ ६४ ॥
अन्ये विरक्ताश्चांग्लेषु[24] स्वोद्धारे कृतबुद्धयः ।
स्वयमेव यतन्तेऽत्र लोके जागृतिकारिणः ॥ ६५ ॥
या चांग्लसंस्कृतिरिति प्रथिता जडमानिनी ।
आंग्लानां सहवासेन सापि राष्ट्रे प्रवेशिता ॥ ६६ ॥
आधिभौतिकसौख्यानां विचारे व्याप्ततो जनः ।
दैविकात्मिकशक्तीनां विचारं नैव कुर्वते ॥ ६७ ॥
देहेन्द्रियसुखायैव मनोबुद्धिविवञ्चना ।
येनात्मिकं समाधानं नष्टप्रायं हितावहम् ॥ ६८ ॥
अशाश्वती सुखावाप्तिर्जनस्तत्रैव मोहितः ।
नष्टा मनःशान्तिरपि ह्यशान्तस्य कुतः सुखम् ॥ ६९ ॥
असंतोषः श्रियो मूलं श्रीः प्रसूते सुखांस्ततः ।
संपादा सापि यत्नेन श्रियां कीर्तिश्चिरंतनी ॥ ७० ॥

एवं नानाकामवशस्तथा लोभसमाकुलः ।
असमाहितवृत्तिश्च दृश्यते रुषितो जनः ॥ ७१ ॥
बाह्योपाधिनिरालम्बि हृदयस्थं निरन्तरम् ।
सुलभं सत्सुखं लोकाः समीहन्ते न केचन ॥ ७२ ॥
विशेषतो ये देशेऽस्मिन्नांग्लसंस्कृतिमण्डिताः ।
तेषां वृत्तिरियं नित्यमसमाधानवर्धिनी ॥ ७३ ॥
यदांग्लराष्ट्रं लोकेषु प्रथितं विभवादिमत् ।
तत्रापि लोकसंतोषो नष्टप्रायो हि सर्वदा ॥ ७४ ॥
श्रीमन्तोऽप्यल्पसंख्यास्ते बाधन्ते स्वाश्रिताञ्जनान् ।
समृद्धः कलहो येन राष्ट्रे संप्रति दृश्यते ॥ ७५ ॥
लोकनेतार इति ये लोकेषु विचरन्त्युत ।
ते कीर्तिलोलुपाः सर्वेऽप्यन्तः स्वार्थपरायणाः ॥ ७६ ॥
ये राष्ट्रशासने लोकसभया वै नियोजिताः ।
तेऽपि लोकस्य संतोषमशक्ताः साधितुं परम् ॥ ७७ ॥
ये धनावाप्तये चांग्लाः पृथग्देशान्तरं गताः ।
वसन्ति सुखिनस्तत्र देशेष्वेव पृथक्पृथक् ॥ ७८ ॥
तैः स्वतन्त्रतया तत्र स्थापितं लोकशासनम् ।
मानितं चांग्लसभया स्वकीयमिति तद्बहु ॥ ७९ ॥
न भारतीयेषु तथा मार्दवं दृश्यते क्वचित् ।
दास्यबन्धगताः सर्वेप्यांग्लानामनयादिह ॥ ८० ॥
स्वसमुन्नतये लोका यतन्ते चेच्च कुत्रचित् ।
घातस्तेषां निश्चितः स्याद्राजशासनमीदृशम् ॥ ८१ ॥
कृता नवीना नियमा धुरीणानां नियन्त्रणे ।
भाषणे लेखने तेषां निर्बन्धाश्चापि निर्मिताः ॥ ८२ ॥
[२५]सभास्थाने समाहूता नागराश्च सहस्रशः ।

पशुभारं मारितास्ते सशस्त्रै राजसैनिकैः ॥ ८३ ॥
एवं बहुविधां पीडां सहन्ते भारते जनाः ।
सोऽयं हि निकषग्रावा स्वराज्यस्य समुज्ज्वलः ॥ ८४ ॥
सहते विविधान्क्लेशान्स्वयत्नं नैव मुञ्चति ।
स भारतीयः पूजार्हो ह्यस्मिन्कार्ये प्रकीर्तितः ॥ ८५ ॥
भवेयुरीदृशाः सर्वे स्वातन्त्र्याप्तौ सुनिश्चिताः ।
हेतुमेतं समुद्दिश्य कुर्याल्लोकस्य शिक्षणम् ॥ ८६ ॥
ऐक्यं सर्वत्र राष्ट्रस्य निर्भया निश्चिता मतिः ।
त्यागबुद्धिश्च सर्वस्वे साधनानीह भारत ॥ ८७ ॥
एवं साधनसंपन्नाः सर्वे भारतवासिनः ।
स्वराज्यमचिरात्प्राप्य मोदिष्यन्तीह भूतले ॥ ८८ ॥
स्वदेशे सौख्यमतुलं परराष्ट्रेषु मान्यता ।
स्वराज्यफलमेतच्च अमृतं स्वादु खादत ॥ ८९ ॥
ईश्वरस्य प्रसादेन सर्वमेतद्भविष्यति ।
हृत्स्थः स सर्वभूतानां शान्तये मङ्गलाय च ॥ ९० ॥
॥ इति श्रीगान्धीगीतायां स्वराज्ययोगो नामैकादशोऽध्यायः ॥ ११ ॥

अथ द्वादशोऽध्यायः ।

भारतीय उवाच ।
यद्राष्ट्रस्य हितार्थाय करणीयमिहोच्यते ।
तत्रेश्वरस्य माहात्म्यं वर्तते वद वा न वा ॥ १ ॥
राष्ट्रेऽत्र विविधा धर्मा आचाराश्च पृथक्पृथक् ।
सर्वत्रेश्वरभावश्च एकरूपः कथं भवेत् ॥ २ ॥
कथमल्ला हि रामेण ख्रिस्तेन वद संयुजेत् ।

कल्पना विविधास्तत्र विरोधिन्योऽपि कुत्रचित् ॥ ३ ॥

महात्मोवाच ।

महंमदीयाः ख्रैस्ताश्च पारसीकास्तथैव च ।
सर्वेष्वीश्वरभावश्च यथास्मासु तथैव सः ॥ ४ ॥
नामतो भेद एवेह अल्ला राम इतीरितः ।
आस्तिक्येन तु सर्वत्र ईश्वरः पूज्यते सदा ॥ ५ ॥
ईश्वरः करुणामूर्तिर्भक्तवात्सल्यपूरितः ।
जगतः स्थितिसंहारौ सृष्टिं चापि करोति सः ॥ ६ ॥
स एव सर्वभूतानां हृद्देशे पश्य तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ ७ ॥
नीतितत्त्वं यथा धर्मे सर्वत्र सममेव हि ।
तथैवेश्वर भावश्चाप्यास्ति केषु समः किल ॥ ८ ॥
मूर्तिमत्त्वं च वैविध्यमस्मद्धर्मे विशेषतः ।
तथापि मूलतस्तत्त्वं नान्यैः किंचिद्विरुध्यते ॥ ९ ॥
अधीता भगवद्गीता कुराणं वापि भक्तितः ।
बैबलं चापि ख्रिस्तानां समुन्नयति वै मनः ॥ १० ॥
ईश्वरे महती श्रद्धा मनोवृत्तिश्च सात्त्विकी ।
उत्पद्यते धर्मवशात्सर्वे धर्माः समा इह ॥ ११ ॥
तस्मादेव स्वके धर्मे रतिः श्रेष्ठा प्रशस्यते ।
आदरः परधर्मेऽपि आचारे विविधे तथा ॥ १२ ॥
ईश्वरप्रेरितं कार्यं तत्प्रीत्यै स्वीकृतं जने ।
निमित्तमात्रं कर्ता च नरस्तेनैव योजितः ॥ १३ ॥
तस्येशस्यैव कारुण्यात्कार्यं सिद्धिमवाप्स्यति ।
इति या सुदृढा भक्तिः सा सर्वेषां सुसंमता ॥ १४ ॥
प्रत्यहं प्रातरुत्थाय परमेशस्य चिन्तनम् ।

पूजनं प्रणिपातश्च विहितः सर्वधर्मिभिः ॥ १५ ॥
मनःप्रसादः सौम्यत्वं शौचमात्मविनिग्रहम् ।
प्रसादात्परपमेशस्य प्राप्नुवन्ति नरा इह ॥ १६ ॥
प्रागेव राष्ट्रधर्मस्य मया विवरणं कृतम् ।
यत्र वै सर्वधर्माणां समावेशो भविष्यति ॥ १७ ॥
राष्ट्रधर्माविरोधेन स्वधर्मस्यानुपालनम् ।
अधिष्ठानं चेश्वरस्य लोकार्थे विहितं शुभम् ॥ १८ ॥
ये चापि नास्तिका राष्ट्रे वर्तन्ते कार्यकारिणः ।
बुद्धिभेदो न तैः कार्यो जनानामीशवादिनाम् ॥ १९ ॥
ईश्वरे भक्तिरचला लोककल्याणकारिणी ।
तत्र भेदे कृते लोकेऽप्यनवस्था भवेत्खलु ॥ २० ॥
तस्मादेवं विचिन्त्यैव लोकसंग्रहकारिणा ।
वर्तितव्यं विवेकेन यत्स्याद्राष्ट्रहितावहम् ॥ २१ ॥
स्वधर्माचरणेनापि राष्ट्रकार्यं न दुष्करम् ।
परधर्मासहिष्णुत्वं तत्त्याज्यं सर्वथा जनैः ॥ २२ ॥
स्वभावनासमुद्दिष्टमीश्वरं भजते नरः ।
स तया श्रद्धयोपेतश्चित्तशान्तिमवाप्नुते ॥ २३ ॥
मिथो द्रोहेण वै हानिरसुखं चैव शाश्वतम् ।
अद्रोहेण सुखं शान्तिः प्रीतिर्लोके जनिष्यति ॥ २४ ॥
तस्मात्सदा श्रद्दधान ईश्वरे च समाहितः ।
स्वस्य चैव परेषां च करिष्यति महद्धितम् ॥ २५ ॥

इति श्रीगान्धीगीतायामीश्वराधिष्ठानयोगो नाम
द्वादशोऽध्यायः ॥ १२ ॥

अथ त्रयोदशोऽध्यायः ।

महात्मोवाच ।

लोकसंग्रहमुद्दिश्य राष्ट्रकल्याणमीप्सुना ।
वर्तितव्यं सदा राष्ट्रे विचार्यैव यथार्थतः ॥ १ ॥
विश्वसंस्तस्य सद्बुद्धौ मानयन्कृतिमप्युत ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ २ ॥
सामान्यतो हि लोकेऽस्मिन्संमतैव परंपरा ।
तामनादृत्य बहुधा लोको नैव प्रवर्तते ॥ ३ ॥
लोकाग्रणीर्यस्य पिता सोऽपि लोकेषु मान्यताम् ।
अयत्नेनैव लभते हेतुस्तत्र परंपरा ॥ ४ ॥
स कृतिं यदि पूर्वेषां सर्वत्रैवमनुस्मरन् ।
लोकरञ्जनशीलः स्याल्लोकमान्यो भवेद् ध्रुवम् ॥ ५ ॥
यदा तु पूर्वमाहात्म्यममत्वैव जने नरः ।
स्वैरवृत्तिर्भवेल्लोके सोऽचिराद्याति तुच्छताम् ॥ ६ ॥
स्वसुखं नैव गणयेत्तस्माल्लोकहिते रतः ।
यतेताप्यनिशं कार्ये एष वै लोकसंग्रहः ॥ ७ ॥
न द्रव्यस्यार्जनं हेतुर्नापि स्वसुखलालसा ।
निरपेक्षस्तु यो नित्यं स कुर्याल्लोकसंग्रहम् ॥ ८ ॥
केचित्कीर्तिं समुद्दिश्य वर्तन्ते लोककारणे ।
सर्वथा संमतास्माकं नैषा वृत्तिस्तु भारत ॥ ९ ॥
लोककल्याणकर्तृणां कीर्तिर्हि सहजं फलम् ।
प्रयत्नस्तु विशेषेण कस्मात्तत्रैव दृश्यते ॥ १० ॥
अल्पस्यापि स्वकार्यस्य वृत्तपत्रेषु घोषणा ।
अन्यैश्च विविधोपायैः कीर्तिप्राप्तिस्तथेष्यते ॥ ११ ॥
अयत्नेनैव संप्राप्तमचिरादेव नश्यति ।

कृतिहीनस्य कीर्तिश्च तथा लोके विलुप्यति ॥ १२ ॥
लोकोपकारकरणे स्वसंतोषोऽपि सिध्यति ।
लोकस्य हि सुखं दृष्ट्वा श्रेष्ठो मनसि मोदते ॥ १३ ॥
बहूनि लोककार्याणि कर्तव्यानीह भारते ।
नानाक्लेशसमापन्नो यत्र वै दृश्यते जनः ॥ १४ ॥
अज्ञानं दुर्बलत्वं च दारिद्र्यं चापि सर्वतः ।
कलहाय प्रवृत्तिश्च स्वल्पादपि च कारणात् ॥ १५ ॥
यस्त्वेता आपदो यत्नाद् दूरीकर्तुं समीहते ।
तथा चोद्यमशीलः स्यात्स वै लोके महीयते ॥ १६ ॥
कलहेनैव राष्ट्रस्य हानिः सर्वत्र दृश्यते ।
अनायासेनेतरेषां लाभस्तत्रैव सिध्यति ॥ १७ ॥
धुरीणेन प्रणाशाय कलहस्यैव मूलतः ।
प्रयत्नः सततं कार्यो येन लोकहितं भवेत् ॥ १८ ॥
अप्रवृत्तिः क्वचित्कार्ये भीत्या स्वार्थवशादपि ।
लोककल्याणमुद्दिश्य धृत्या तत्कार्यमेव तु ॥ १९ ॥
नेता एव यदा स्वार्थबुद्धिर्भीत्येव वर्तते ।
तदा लोका भवन्तीह स्वकर्तव्यपराङ्मुखाः ॥ २० ॥
इमं भावं समुद्दिश्य गीतासु प्रोक्तवान्हरिः ।
स्वकर्तव्यविमूढाय पार्थाय समुपादिशन् ॥ २१ ॥
क्षात्रवृत्तिरियं लोके युद्धे चाप्यपलायनम् ।
प्रमुखैः पालनीया हि लोकसंग्रहकारणात् ॥ २२ ॥
ये तु दम्भमुपाश्रित्य वञ्चयन्ति जनानिह ।
अन्ते ते हास्यतां यान्ति सर्वैरपि लघूकृताः ॥ २३ ।
लोकान्प्रकाशयन्तीह स्वेन सत्त्वबलेन ये ।
तेषामेव विभूतित्वं लोकैः संप्रतिपूज्यते ॥ २४ ॥

गीतैः स्तुवन्ति वन्दन्ते सर्वे भक्त्या यथेश्वरम् ।
तस्मात्सत्त्वं समाश्रित्य लोकसंग्रहमाचरेत् ॥ २५ ॥
एकोऽपि दुर्गुणो लोके कीर्तिं नाशयतीह वै ।
विचारमथ चाचारं नेतॄणां वीक्षते जनः ॥ २६ ॥
स्वीकर्तव्यं नरेणेदं व्रतं कष्टतरं महत् ।
स्वार्थं ममत्वं त्यक्त्वेह लोककल्याणकारणात् ॥ २७ ॥
एवंगुणविशिष्टं तं महात्मानं जना अपि ।
विभूतिमत्त्वं श्रैष्ठ्यं तेऽप्यर्पयन्ति समाहिताः ॥ २८ ॥

॥ इति श्रीगान्धीगीतायां लोकसंग्रहयोगो नाम त्रयोदशोऽध्यायः ॥१३॥

अथ चतुर्दशोऽध्यायः ।

भारतीय उवाच ।

विभूतिमत्त्वे सहज ईशतेजोंशसंभवः ।
विस्तरेण वदस्वैतद्विषये पुनरेव हि ॥ १ ॥
हतभाग्ये हि राष्ट्रेऽस्मिन्का वाभूवन्विभूतयः ।
यासां सततयत्नेन लोका उपकृताः भृशम् ॥ २ ॥

महात्मोवाच ।

पुरास्मिन्भारते वर्षे ऋद्धिमत्सु दिनेषु वै ।
सर्वत्र स्म प्रदृश्यन्ते तेजस्विन्यो विभूतयः ॥ ३ ॥
राजकार्यधुरीणाश्च लोककल्याणकारिणः ।
सुशीलाश्चैव विद्वांसः कुशला युद्धकर्मणि ॥ ४ ॥
वेदवेदाङ्गतत्त्वज्ञा नानाशास्त्रेषु पारगाः ।
मान्या महान्तो बहव येषां कीर्तिर्धरातले ॥ ५ ॥
चतुःषष्टिकलाभिज्ञा वाणिज्येऽपि कृतश्रमाः ।

इत्येतद्भारतीयानां माहात्म्यं चोपवर्णितम् ॥ ६ ॥
इदानीं पारतन्त्र्येण राष्ट्रे त्वस्मिन्नियन्त्रिते ।
लुप्ता तेजस्विता लोको दीनश्च तमसावृतः ॥ ७ ॥
धर्मे निष्ठा च शुचिता तथा सा स्वाभिमानिता ।
नष्टप्राया कालवशान्नष्टा राष्ट्रेषु मान्यता ॥ ८ ॥
शूराश्च कृतविद्याश्च सर्वे स्मृतिपथं गताः ।
शास्त्रज्ञा नैव दृश्यन्ते नैव युद्धस्य कारणम् ॥ ९ ॥
अशस्त्राः सर्वतो लोकाः कारिताः क्लीबवद् भुवि ।
शस्त्रस्य दर्शनेनैव भीरेषां कम्प एव च ॥ १० ॥
यत्र वै पारतन्त्र्यस्य प्रभावो दुरतिक्रमः ।
ऋद्धिः क्षीणा भवेत्तत्र क्रमेणैवेति मे मतिः ॥ ११ ॥
स्थैर्ये स्वातन्त्र्यकाले तु लोकाः शास्त्रकलास्विह ।
नैपुण्यं प्रान्पुवन्त्येते स्वतस्तत्र कृतोद्यमाः ॥ १२ ॥
तस्मादादौ लोकसुखं स्वतन्त्रं कर्तुमुद्यताः ।
उदासीनाश्च स्वसुखे पश्यात्रत्या विभूतयः ॥ १३ ॥
प्रतिकूलेऽपि कालेऽस्मिन्भारतीया विभूतयः ।
राष्ट्रोन्नतिं समुद्दिश्य वर्तन्ते यत्नमास्थिताः ॥ १४ ॥
वाङ्मये कृतधीरेको रवीन्द्रेण[२६] समः पुमान् ।
तथैव जगदीशोऽपि[२७] सृष्टिशास्त्रे प्रकाशते ॥ १५ ॥
एवमद्यापि दृश्यन्ते विद्वांसो भारते क्वचित् ।
बहुशश्च कृतोत्साहा नेतारो राजकारणे ॥ १६ ॥
येनोपायेन लोकानां क्लेशो वै पारतन्त्र्यजः ।
नश्येत सर्वथा तं तेऽप्युपायं चिन्तयन्ति वै ॥ १७ ॥
सा चित्ते सततं चिन्ता वाचा तत्रैव चोद्यमः ।
शरीरेणापि कार्यस्य गतिस्तत्रैव दिश्यते ॥ १८ ॥

एवं बहुविधा धीरा यावज्जीवं कृतश्रमाः ।
लोकैरद्यापि पूज्यन्ते केचित्स्मृतिपथं गताः ॥ १९ ॥
सम्यक्प्रयत्नैरेतेषां यदा राष्ट्रे सुखं भवेत् ।
तदा विभूतिरेता वै पूजयेद्भक्तितो जनः ॥ २० ॥
स्वातन्त्र्ये समवाप्ते च समृद्धिरपि सर्वथा ।
भवेच्छास्त्रकलावृद्धिर्लोकानां सुखकारिणी ॥ २१ ॥
एतां स्थितिं समुद्दिश्य यतन्ते ये दिवानिशम् ।
ते सर्वेऽपि महात्मानो वक्ष्ये निर्देशतश्च तान् ॥ २२ ॥
राष्ट्रकल्याणकृद्बुद्धिरत्र ग्राह्या विविक्षुभिः ।
सा हेतुर्हि प्रशंसायां परिणामो न कुत्रचित् ॥ २३ ॥
[२८]एवं येऽप्यविचारेण दुष्टाः स्युश्च स्वतः कृतौ ।
तेऽत्र हेतुं पुरस्कृत्य प्रशंसार्हा मता मम ॥ २४ ॥
तिष्ठन्तु तेऽप्यनिर्दिष्टा अज्ञाताश्च तथापरे ।
येषां ख्यातिस्तु सर्वत्र तेषां कांश्चिद्ददामि ते ॥ २५ ॥
तत्रोत्तरेण चारभ्य लाला लजपतः[२९] सुधीः ।
येन लोकहिते यावदायुर्जीवितमर्पितम् ॥ २६ ॥
विरोधादप्रियो राज्ञां स्वदेशाच्च बहिष्कृतः ।
देशान्तरं गतश्चापि स्वजनस्य हिते रतः ॥ २७ ॥
एवमन्यः सत्त्वशीलो मालवीय[३०] इति श्रुतः ।
सदा विगतभीर्लोके विचरत्यत्र साधुकृत् ॥ २८ ॥
येन काश्यां स्थापितं तद्विद्यापीठं सुविस्तृतम् ।
सहस्रशो भारतीयाः शिक्ष्यन्ते शास्त्रपारगैः ॥ २९ ॥
स्वकीयानां च दैन्येन यच्चित्तं व्यथितं किल ।
यावच्छक्यं सुखोपाये यतते पण्डितः सदा ॥ ३० ॥
प्रान्ते तत्रैव विख्यातावुदारौ नेहरूत्तमौ[३१] ।

पितापुत्रौ राजनीतिनिपुणौ लोकविश्रुतौ ॥ ३१ ॥
ऐश्वर्यं राजसदृशमधिकारिषु मान्यता ।
परित्यक्तं सर्वमेतन्मोतीलालमहात्मना ॥ ३२ ॥
जवाहरस्तत्सुतोऽपि सुखभोगे विरागवान् ।
देशभक्त्याप्युज्ज्वलया भारतेऽत्र विराजते ॥ ३३ ॥
बुद्धिमान्नीतिमान्वक्ता स्वकीयेषु दयापरः ।
एतादृशो हि विरलो राष्ट्रोद्धारे कृतोद्यमः ॥ ३४ ॥
तत्रैव दिल्लीनगरे[३२] श्रद्धानन्देति नामतः ।
कृतसर्वस्वसंन्यासः स्वजनार्थमुदारधीः ॥ ३५ ॥
धर्मान्तरगतानां यः परावर्तनमात्मवान् ।
चकार[३२] मृत्योराह्वानं तत्रैव गतभीः स्वयम् ॥ ३६ ॥
वङ्गीया राष्ट्रभक्ताश्च राजकार्यधुरंधराः ।
बहवः सन्ति चाभूवन्सर्वे कुशलबुद्धयः ॥ ३७ ॥
वङ्गभङ्गप्रतीकारे यो लोकानां धुरि स्थितः ।
सुरेन्द्रनाथः[३३] सुयशा लोकैरद्यापि स्मर्यते ॥ ३८ ॥
मृतोऽप्यमृत एवासौ यस्येहामृतपत्रिका ।
प्रकाशते देशभक्त्या मोतीलालः[३४] समुज्ज्वलः ॥ ३९ ॥
अदासी कर्तुमात्मीयान्दासो रञ्जन[३५] ईहते ।
संपत्सुविपुला येन चार्पिता लोकहेतवे ॥ ४० ॥
सुभाष बोसो[३६] गुप्तश्च सेनपूर्वस्तथापरः ।
एतौ चान्येऽपि बहवः सन्त्यद्यापि विचक्षणाः ॥ ४१ ॥
अरविन्दः[३७] प्रशान्तात्मा योगयुक्तः समाहितः ।
स्वकीयानां समुद्धारं चिन्तयन्नाश्रमे स्थितः ॥ ४२ ॥
दाक्षिणात्येष्वपि तथा आचार्याः[३८] सन्ति केचन ।
येषां लोकपरा बुद्धिर्भारतीयैः प्रशस्यते ॥ ४३ ॥

महाराष्ट्रेषु[३९] तिलकोऽप्यग्रणीतिलकस्तथा ।
राजकीयेषु चतुरो गीतागूढार्थतत्त्ववित् ॥ ४४ ॥
प्रवर्तितो येन लोके नादगम्भीरकेसरी ।
क्षुद्राणां कम्पयत्येव अद्यापि हृदयानि सः ॥ ४५ ॥
एवं गोपालकृष्णोऽ[४०]पि यस्य भारतसेवकाः ।
लोकसेवां प्रकुर्वन्तः स्वायुष्यं यापयन्ति हि ॥ ४६ ॥
तेषां स चाग्रणीः शास्त्री[४१] रमते यः सदुद्यमे ।
यतते लोककल्याणायानिशं स उदारधीः ॥ ४७ ॥
महंमदीयाश्चान्येऽपि भवन्ति कृतबुद्धयः ।
ये स्वतो भारतीयानां हितार्थे निरताः सदा ॥ ४८ ॥
यदत्र राज्यकर्तारो बुद्धिभेदे कृतश्रमाः ।
महंमदीयानस्माकं विरोधे स्थापयन्ति ते ॥ ४९ ॥
अवमत्यैव तान्यत्नान्ये राष्ट्रहितबुद्धयः ।
रमन्ते लोककार्येषु ते प्रशस्यतरा इह ॥ ५० ॥
एवमन्येऽपि बहवो धनेन मनसा कृतैः ।
स्वबान्धवसुखायैते यतन्ते सुधियः सदा ॥ ५१ ॥
गुर्जराः पारसीकाश्च वाणिज्यनिरता अपि ।
दत्वा धनं बहुविधं साधयन्ति कृतार्थताम् ॥ ५२ ॥
ये त्वनिर्दिष्टनामानस्तेऽपि शस्यतमा इह ।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ ५३ ॥
राष्ट्रकार्ये महत्यस्मिन्नपेक्ष्यन्ते सहस्रशः ।
निःस्वा धीराश्च ते सर्वेऽप्यर्हन्तीह विभूतिताम् ॥ ५४ ॥

॥ इति श्रीगान्धीगीतायां विभूतियोगो नाम चतुर्दशोऽध्यायः ॥ १४ ॥

अथ पञ्चदशोऽध्यायः ।

महात्मोवाच ।

एवं सततयुक्ता ये महात्मानः सुबुद्धयः ।
प्रकाशते सदा तेषु तेजसा पुरुषोत्तमः ॥ १ ॥
द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वत्र लोकेषु अक्षरः पुरुषोत्तमः ॥ २ ॥
क्षरा प्रकृतिरेवैषां मूलतश्चञ्चला हि सा ।
नैकत्र रमते बुद्धिर्वैविध्ये च सदा रता ॥ ३ ॥
प्रारब्धं कार्यमेवेह नान्तं किंचित्समाप्नुते ।
अपूर्णं त्यज्यते लोकैर्विमूढैर्विघ्नसंशयात् ॥ ४ ॥
अथवान्यल्लाभकरं कार्यं दृष्ट्वा सुमोहिताः ।
प्रथमं यद्धस्तगतं तत्त्यजन्त्यल्पबुद्धयः ॥ ५ ॥
लोभातीतो भयातीतः स्वीकृते कृतनिश्चयः ।
कार्यसिद्धिं समुद्दिश्य यतते पुरुषोत्तमः ॥ ६ ॥

भारतीय उवाच ।

विस्तरेण पुनर्ब्रूहि कृत्यमस्य महात्मनः ।
उत्तमत्वाद्धि लोकेऽसौ पुरुषोत्तम ईरितः ॥ ७ ॥
गार्हस्थ्ये वर्तमानोऽपि लभेद्वा सिद्धिमीदृशीम् ।
धर्मे चार्थे च कामे च कथं वर्तेत तन्मतिः ॥ ८ ॥
केषां गुणानां वै तस्मिन्नधिष्ठानं प्रयुज्यते ।
कानि चिन्हानि यैर्लोके ज्ञातुं शक्येत सोऽचिरात् ॥ ९ ॥

महात्मोवाच ।

सत्यं सदुर्गमो लोके ज्ञातुं तत्त्वेन भारत ।
यतोऽस्य कीर्तिविषये लालसा नैव विद्यते ॥ १० ॥
आत्मन्येव समाधानमात्मना प्राप्तवानसौ ।

येनान्यतः स साहाय्यं न कदाचिदपेक्षते ॥ ११ ॥
गार्हस्थ्ये वर्तमानोऽपि यः संन्यासी विरागवान् ।
स्वभावतः कर्मयोगी सहजे कर्मणि स्थितः ॥ १२ ॥
परार्थो वै यदा शक्यो भवेत्तस्य प्रयत्नतः ।
स्वयमेव तदागत्य परार्थे यतते सुधीः ॥ १३ ॥
सिद्धे परार्थेऽनीहः सन्स्तुतिमात्रेऽपि लौकिके ।
स्वकीयां सहजां वृत्तिमचिरात्पुनरश्नुते ॥ १४ ॥
ज्ञाता लौकिकवृत्तीनामुद्यतो लोकहेतवे ।
स्वार्थे विरक्तः सर्वत्र कथं वन्द्यः स नो भवेत् ॥ १५ ॥
एतादृशा हि पुरुषाः पूर्णेनांशेन निर्मिताः ।
ईश्वरेण स्वकीयेन जगदुद्धारकारणात् ॥ १६ ॥
तमेव सततं ध्यात्वा तेनैव प्रेरिता भृशम् ।
कार्योद्यता भवन्तीह सर्वे तस्यैव प्रीतये ॥ १७ ॥
ईश्वरप्रेरिते कार्ये निःशङ्का निर्भयाश्च ते ।
समाः सिद्धावसिद्धौ च रमन्ते पुण्यकारिणः ॥ १८ ॥
लाभे न सुखमेतेषां हानिरेषां न दुःखदा ।
त्यक्तस्वाः सततं धीरा विराजन्ते सदा भुवि ॥ १९ ॥
अन्ये तेजस्विनः सन्ति बुद्धिमन्तो निरालसाः ।
ये स्वकार्यबलाद्राष्ट्रे धुरीणत्वपदं गताः ॥ २० ॥
तेषां संमानपूजासु लोकोऽपि रमते मुदा ।
यथा कृतार्थता पश्य उभाभ्यामनुभूयते ॥ २१ ॥
लोककल्याणकार्ये तु दक्षोऽपि पुरुषोत्तमः ।
न मानपूजामादत्ते एकाकी संवसन्सुखी ॥ २२ ॥
भारतीया युवानो ये तैः स्वीकर्तव्यमीदृशम् ।
व्रतं कष्टतमं यत्तु स्वकीयानां हितावहम् ॥ २३ ॥

आंग्लानां मायथा सर्वे मोहिता हिन्दबान्धवाः ।
मोक्षोपायमजानन्तः क्लिश्यन्ते पीडिता भृशम् ॥ २४ ॥
अज्ञानतिमिरान्धानामेषां सन्मार्गदर्शकाः ।
भवेयुस्तरुणा एव शिक्षयन्तः स्वतश्च तान् ॥ २५ ॥
ये त्वांग्लपाठशालासु शिक्षिता युवका इह ।
तैरेवैवं स्वकीयानां यतितव्यं समुन्नतौ ॥ २६ ॥
निरीहैः स्वसुखावाप्तौ राजसंमाननादिषु ।
राष्ट्रकार्यमिदं चादौ साधितव्यं प्रयत्नतः ॥ २७ ॥
त्यागशीलैर्भारतीयैः कार्यं दिव्यमलौकिकम् ।
तेन दास्याद्विनिर्मुक्तिरचिराद्वै भवेदिह ॥ २८ ॥
येनैवं कृतिनो लोका अजानन्तोऽपि सर्वशः ।
भवेयुः सुखिता राष्ट्रे धुरीणानां समुद्यमात् ॥ २९ ॥
दैवीसंपत्सत्त्वनिष्ठा दृश्यते पुरुषोत्तमे ।
सूज्ञैः संपादनीया सा युवभिश्च सुशिक्षितैः ॥ ३० ॥

॥ इति श्रीगान्धीगीतायां पुरुषोत्तमयोगो नाम
पञ्चदशोऽध्यायः ॥ १५ ॥

अथ षोडशोऽध्यायः ।

भारतीय उवाच ।

दैवी संपद्विमोक्षाय निबन्धायासुरी मता ।
स्मृतमेतद्भगवतो वाक्यं वै वचनात्तव ॥ १ ॥
दैवी संपत्कथं चास्मान्मोक्षयिष्यति तद्वद ।
बद्धाः के वा वदासुर्या ये न जानन्ति किंचन ॥ २ ॥
मोक्षोऽपि वद चैतेषां केनोपायेन वै भवेत् ।

भारतीयाः कथं वात्र यतेरन्स्वविमुक्तये ॥ ३ ॥
राष्ट्रकार्ये कथं वै स्याद्दैवीसंपत्सुखावहा ।
मूढानां सर्वथास्माकं भव सत्पथदर्शकः ॥ ४ ॥

महात्मोवाच ।

पुरा भगवता सर्वं पार्थाय विशदीकृतम् ।
तदेव वः प्रवक्ष्यामि गीतातात्पर्यमुत्तमम् ॥ ५ ॥
गीताधर्मे हि कर्माणामनासक्तिर्विशिष्यते ।
राष्ट्रकार्येऽपि सैवेह भवेत्सिद्धिकरी नृणाम् ॥ ६ ॥
अभयं प्रथमं तावद्दैवीसंपद्विशेषणम् ।
सेवितव्यमिहास्माभिरादौ राष्ट्रहितावहम् ॥ ७ ॥
मृत्युभीतिः क्लेशभीतिर्निन्दाभीतिस्तथैव च ।
एवं सदा भीतभीता वयं दैन्यमुपास्महे ॥ ८ ॥
तत्रापि मरणाद्भीतिः सर्वास्वपि विशिष्यते ।
राजदण्डात्स्वयं तेन द्रवामः कम्पिताः सदा ॥ ९ ॥
ईश्वरप्रेषिताश्चैतेऽप्यांग्लाः शासनधारिणः ।
इति श्रद्धायुता भीत्वा प्रणतास्तान्सदा वयम् ॥ १० ॥
भीतिं तां वै निराकृत्य धैर्यमालम्ब्य यत्नतः ।
तेषां च पुरतोऽस्माभिः स्थातव्यं कार्यसिद्धये ॥ ११ ॥
माहात्म्यमभयस्यैवं सहजं सिद्धमेव च ।
निर्भयानां हि कार्यस्य गतिः सर्वत्र विद्यते ॥ १२ ॥
स्वीकृते कर्मणि मतिः स्थिरा इत्यप्यपेक्ष्यते ।
चञ्चला वृत्तिरेवेह कार्ये हानिकरी नृणाम् ॥ १३ ॥
परतन्त्रस्य राष्ट्रस्य स्वाध्यायोऽपि विधीयते ।
कर्तृत्वं पूर्वजानां तद्येनानुक्रियते जनैः ॥ १४ ॥
शारीरं वाङ्मयं चैव मानसं त्रिविधं तपः ।

यः साधयति राष्ट्रार्थे स देवस्यांश उच्यते ॥ १५ ॥
स्वकीयेषु क्षमावृत्तिरक्रोधः शान्तिरेव च ।
दौरात्म्यस्य प्रतीकारे धृतिस्तेजश्च मानिता ॥ १६ ॥
दैवीसंपद्विशिष्टोऽयं लोकः प्रायो यदा भवेत् ।
तदा समृद्धिःसौख्यस्याप्यचिरादागमिष्यति ॥ १७ ॥
आसुरी राजसी वृत्तिस्तामसी राक्षसी तथा ।
एताभ्यां प्रत्यवायोऽत्र राष्ट्रकार्ये ह्यनेकधा ॥ १८ ॥
सुखाभासान्समुत्पाद्य विविधांल्लोकमोहनान् ।
एताभ्यां नीयते लोकोऽप्यसत्पथि सहस्रशः ॥ १९ ॥
राजसंसदि संमानश्चातुलं मोहनं नृणाम् ।
येन स्वकीयघाताय सज्जन्ते प्राकृता नराः ॥ २० ॥
वृथाभिमानात्पश्यैते दण्डेन प्रहरन्त्युत ।
स्वबान्धवान्सुनिःशङ्काः सत्कार्यनिरतानपि ॥ २१ ॥
परसेवारताः सर्वे स्वकीयान्गणयन्ति न ।
अस्मत्कर्तव्यमेवेदं प्रलपन्तीति सर्वतः ॥ २२ ॥
केषांचित्पश्य मानाशा केषांचिद्भोगलालसा ।
एवं हि बहुभिर्लोके आसुरी वृत्तिरिष्यते ॥ २३ ॥
प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ २४ ॥
ततोऽपि राक्षसीं वृत्तिं निन्द्यां केचित्समासते ।
क्लेशाय सर्वथा नृणां या स्याद्धानिकरी भृशम् ॥ २५ ॥
परकल्याणभावेन दैवी वृत्तिरधिष्ठिता ।
यत्र स्वसौख्यवैराग्यं सहजं वै प्रतीयते ॥ २६ ॥
स्वसौख्यमानमाहात्म्यमुद्दिश्यासुरवृत्तयः ।
यतन्ते परकार्येषु उदासीनाः स्वबन्धुषु ॥ २७ ॥

परस्योत्सादनार्थं वै सज्जते राक्षसी मतिः ।
उत्तमाधममध्यानां विवेकं पश्य सर्वथा ॥ २८ ॥
तस्मोद्देवी संपदेव लोककल्याणकारिणी ।
मता श्रेष्ठतमा चेह सा संपाद्या प्रयत्नतः ॥ २९ ॥
निरस्य मोहकलिलं वितरिष्यति शाश्वतीम् ।
तेजःसमृद्धिं सैवेह मातृभूमेः सुखाय नः ॥ ३० ॥
॥ इति श्रीगान्धीगीतायां दैवासुरसंपद्विभागयोगो नाम षोडशोऽध्यायः ॥ १६ ॥

अथ सप्तदशोऽध्यायः ।

सजय उवाच ।

मिथः संवदतोरेवमितरेषां च शृण्वताम् ।
प्रादुरासीत्ततस्तत्र हिन्दमाता यशस्विनी ॥ १ ॥
उपविष्टस्य तस्यैव शरीराद्वै महात्मनः ।
निःसृतेव पुरो भाति महदाश्चर्यमीदृशम् ॥ २ ॥
तस्यां प्रादुर्भवन्त्यां वै विद्युन्माला नभोगता ।
लिलेख स्फुरितैश्चित्रैर्विचित्रमतिभास्वरम् ॥ ३ ॥
सागरः प्रजगर्जाथ वीचीभिश्च तथोच्छ्रितम् ।
यथा मिलितमेव स्यान्नभसः सागरस्य च ॥ ४ ॥
पृथिव्यां च समुद्भूतो निनदः सुमहांस्तथा ।
यदा चेयं मातृभूमिराविरासीच्छरीरिणी ॥ ५ ॥
मलिनं जीर्णमेवैकं बिभ्रती वस्त्रमातुरा ।
विवर्णवदना दीना क्लिश्यमानेव चान्तरा ॥ ६ ॥
तस्याः पादौ तथा हस्तौ सुबद्धौ शृङ्खलायुतौ ।

भीतेव सर्वतो देवी पश्यन्ती शरणार्थिनी ॥ ७ ॥
त्रायध्वमिति दुःखार्ता रुदती करुणं बहु ।
पाशैर्निगडिता क्षीणा दृष्ट्वा सर्वैरधोमुखी ॥ ८ ॥
तां दृष्ट्वैव सुसंभ्रान्ता भारतीयपुरःसराः ।
ततः प्राञ्जलयः सर्वे परिवार्याग्रतः स्थिताः ॥ ९ ॥

भारतीय उवाच ।

का त्वं मातर्नमस्तेऽस्तु किं ते दुःखं वदेह नः ।
वयं हि बान्धवाः सर्वे निर्देशेऽत्र तव स्थिताः ॥ १० ॥
अत्राप्यागमनं दूरात्तापदं प्रतिभाति ते ।
वेषो दीनतमश्चायं विवर्णा चैव दृश्यसे ॥ ११ ॥

मातोवाच ।

युष्माकं यत्र वै जन्म यत्र चैव सुपोषणम् ।
सा हिन्दभूमिः प्रख्याता एषा वः पुरतः स्थिता ॥ १२ ॥
विहरन्तः सदाप्यत्र न देवास्तृप्तिमाप्नुवन् ।
लोके पुण्यतमा भूमिरिति कीर्तिः पुरा मम ॥ १३ ॥
सैवेदानीं निगडिता परदास्येन पुत्रकाः ।
बन्धनैराकुला त्राणं न पश्यामि कुतश्चन ॥ १४ ॥

संजय उवाच ।

श्रुत्वैवं वचनं तस्या व्याकुलो विस्मितस्तथा ।
प्रणम्योवाच दुःखार्तो भारतीयः स्वमातरम् ॥ १५ ॥
दुर्लभं भारते जन्म मानुष्यं तत्र दुर्लभम् ।
पूर्वेषां महिमानोक्तिरियं विफलतां गता ॥ १६ ॥
येन पूर्वकृतं पापमभुक्तं स पुनर्भवन् ।
भारते जन्म लभते दुःखभावाय सर्वथा ॥ १७ ॥

हा धिक् कष्टं जीवितं चास्मदीयं
क्लेशास्पदं सर्वथैवोपपन्नम् ।
न जानीमो दुष्कृतीनां विपाकः
पूर्वासां वा कारणं वान्यदत्र ॥ १८ ॥

क्व प्राचीनं वैभवं भारतीयं
तन्माहात्म्यं यद्धि वेदेषु गीतम् ।
क्व ते धीराः पुरुषा भारतीया
जातैश्च यैर्जन्मभूमिः कृतार्था ॥ १९ ॥

अहो मातः शंसितुं ते हि रूपं
प्रोत्साहिताः कवयः साधुवृत्ताः ।
तेषां काव्यममृतं दीप्तिमच्च
पश्यास्माक पूज्यतम मत च ॥ २० ॥

या पुण्यभूमिः प्रथितेह लोके
यत्राभूवन्राजसूयाश्वमेधाः ।
आत्मज्ञाने निरताः सर्वदैव
राजानो वै ब्राह्मणाश्चाप्यभूवन् ॥ २१ ॥

चातुर्वर्ण्यं यत्र संस्थापितं स-
त्सर्वेषां वै सौख्यहेतुर्बभूव ।
सर्वे तुष्टा ऋद्धिमन्तो जनाश्च
स्वस्मिन्कर्मण्येव संतोषभाजः ॥ २२ ॥

स्वाध्यायिनो यत्र विप्रा बभूवु-
र्दयालवश्चैव वैराग्यशीलाः ।
आर्तानां वा रक्षणे वीरवृत्तिः
क्षत्रे ह्यासीत्सर्वथा या प्रशस्या ॥ २३ ॥

वाणिज्येऽपि स्वस्तिमन्तो हि वैश्या
कृषीवलाः सस्यसमृद्धिभाजः ।
सेवाकार्ये सौख्यमेवेह लोके
भुञ्जानोऽसौ प्रीतिमाञ्शूद्र आसीत् ॥ २४ ॥

पुण्यश्लोकाः पार्थिवा यत्र चास-
न्नामश्च कृष्णश्च युधिष्ठिराद्याः ।
येषां कथाः पावनास्ताः पठन्तो
लोका मातस्तृप्तिमद्यावहन्ति ॥ २५ ॥

यत्राभूवंश्चन्द्रगुप्तादयो ये
विजिग्युराजावपरान्नृपालान् ।
येषां कीर्तिः प्रसृता दूरदेशे
तत्रत्यैर्या वर्णिता चेतिहासे ॥ २६ ॥

हिमालयो रक्षति यामुदीच्यां
सौन्दर्यात्मा प्रथितः शैलराजः ।
यत्रास्य नित्यं धवले च सानौ
रमन्ते वै रुद्रमुखाः सुरेन्द्राः ॥ २७ ॥

यत्रोद्गता ब्रह्मपुत्रा च गङ्गा
सिन्धुर्यथा विस्तृतः सागरोऽन्यः ।
तथेतराभिश्च सरिद्भिरेष
देशः कृतः सस्यमयः समृद्धः ॥ २८ ॥

कटिप्रदेशे प्रसृतश्च विन्ध्यः
सह्यस्तथा दक्षिणस्यां दिशायाम् ।
नानानद्यः स्वजलैस्तर्पयन्ति
मातुः सुतान्विपुलैर्भारतीयान् ॥ २९ ॥

क्षेत्राणि तीर्थानि च पावनानि
स्वयं लोकान्सत्पथं दर्शयन्ति ।
महोदधिः खेलति प्रान्तदेशे
पुष्णातु सा मातृभूमिः सदास्मान् ॥ ३० ॥
वन्दामहे ते अयि पादपङ्कजं
सेवामहे सर्वथा प्रीतये च ।
तवोत्कर्षं चिन्तयन्तो न शान्ति
भजामहे साधुना नः प्रसीद ॥ ३१ ॥

संजय उवाच ।

एवमुक्ता तदा पुत्रैर्विवर्णवदनैर्भृशम् ।
माता प्रोवाच तान्सर्वान्बोधयन्ती स्थितिं स्वकाम् ॥ ३२ ॥
पुरा कुपुत्रैः परिपीडिताहं
कृता परेषां वशगास्तु धिक्तान् ।
मिथो द्वेषात्कलहाद्धानिरेषा
आपादिता ज्ञायते नैव कैश्चित् ॥ ३३ ॥
तत्रापीदं दुःखमत्यन्तमेव
यद्दास्यस्था हीनतामाप्नुवन्तः ।
सुखोदर्कां स्वां स्थितिं कल्पयन्ते
तत्रारमन्ते मुदिता विमूढाः ॥ ३४ ॥
स्वकीयान्परवत्त्यक्त्वा परकीयान्भजन्ति ते ।
दास्यं च बहु मन्वानाः किं नु दुःखमतः परम् ॥ ३५ ॥
इस्लामीयाः परकीयास्तथापि
मदङ्कमाश्रित्य भृशं कृतार्थाः ।
वसन्ति मां जन्मभूमिं च मत्वा
मत्पुत्रास्ते बान्धवा युष्मदीयाः ॥ ३६ ॥

अन्येऽप्येवं पारसीकादयश्च
यैः स्वीकृताहं बत मातृबुध्या ।
मोदन्तां ते सर्व एवैक्यभावे
बन्धुत्वेन प्रार्थिता वर्तमानाः ॥ ३७ ॥
एषु द्वैतं कारयित्वा यतन्ते
आंग्ला एते राज्ययन्त्रस्य सिद्धौ ।
इस्लास्मीयान्हिन्दुजने विरुद्धा-
न्कृत्वा धूर्ताः स्वार्थपरा हसन्ति ॥ ३८ ॥
एषां प्रियः कश्चिदपीह नास्ति
स्वार्थायैते वञ्चयन्तीह लोकान् ।
लोभाविष्टः क्षुद्रमतिर्जनोऽपि
दास्यायासौ यतते कष्टमेतत् ॥ ३९ ॥
एतां लोके दुर्गतिं बोधयन्तः
सत्पुत्रा मे लालबालौच पालः[४२]
आंग्लानां वै कोपदृष्ट्या प्रदग्धा
गता इतः स्वान्तरा क्लिश्यमानाः ॥ ४० ॥
तथैवायं यतमानो महात्मा
युष्मद्वशां कार्यसिद्धिं प्रपश्यन् ।
अपेक्षते निश्चयं चैक्यभावं
कार्ये रतिं क्लेशसहां च वृत्तिम् ॥ ४१ ॥
एवं प्रयतमानेषु युष्मासु विजयो ध्रुवः ।
ममापि बन्धनिर्मुक्तिः संशयो नात्र विद्यते ॥ ४२ ॥
॥ इति श्रीगान्धीगीतायां मातृदर्शनयोगो नाम
सप्तदशोऽध्यायः ॥ १७ ॥

अथ अष्टादशोऽध्यायः ।

भारतीय उवाच ।

मातृद्रोहात्मकं घोरं पापं चरितमीदृशम् ।
तेन तप्यामहे मातः पतिता निरयेऽधुना ॥ १ ॥
सापि दुःस्थितिरस्माकमतीव क्लेशकारिणी ।
निराकरिष्यते चांग्लैरचिराच्छासने स्थितैः ॥ २ ॥
एवं दुराशया विद्धाः सर्वदा तानुपास्महे ।
तेषां कृपाकटाक्षेण वाञ्छन्तश्च समुन्नतिम् ॥ ३ ॥
इदानीं तु महात्मासौ सर्वेषामग्रणीः सुधीः ।
यद्वदिष्यति तत्कर्तुं निश्चयेन स्थिता वयम् ॥ ४ ॥
लोकेऽवमानिता नित्यमुदरंभरणेऽक्षमाः ।
यास्यमानाः क्षयं चाद्य स्वधर्माय प्रबोधिताः ॥ ५ ॥
मातर्मा खिद्य शोच्यं ते यद्व्रतं न कदापि तत् ।
यतामहेऽधुना सर्वे तव बन्धविमुक्तये ॥ ६ ॥
न भवामः प्रचलिताः कार्यात्प्राणात्ययेऽपि च ।
मातः प्रसीद पाह्यस्मान्दयां कुरु दयां कुरु ॥ ७ ॥

संजय उवाच ।

इत्युक्त्वा प्रणताः सर्वे मातुः स्पृष्ट्वा पदावुभौ ।
सापि तान्पुनरेवाह हिन्दभूमिः शरीरिणी ॥ ८ ॥

हिन्दमातोवाच ।

स्थिरबुद्धिर्यदीयं वो व्रतं स्याद्यदि स्वीकृतम् ।
भाग्योदयस्य कालोऽयं सहजः स्यादुपस्थितः ॥ ९ ॥
सर्वे यतध्वं कार्येषु वचनेन महात्मनः ।
जात एष सुपुत्रो मे ईश्वरस्य प्रसादतः ॥ १० ॥
ये नियुक्ता परैरत्र राज्ययन्त्रस्य रक्षणे ।

ये चास्मदीयास्तेषां वै सेवका वशगास्त्विह ॥ ११ ॥
ते युष्मान्विविधोपायैर्भीषयिष्यन्ति पुत्रकाः ।
सुखसंदर्शनैश्चापि मोहयिष्यन्ति सर्वथा ॥ १२ ॥
तेषां कृतिषु वाक्येषु हास्येषु रुदितेष्वपि ।
विश्वासो नैव कर्तव्यो मिथ्या तन्मोहचेष्टितम् ॥ १३ ॥
" भवतामेव सौख्याय दूरादागत्य वै वयम् ।
क्लेशिता अपि राष्ट्रस्य हिताय प्रयतामहे ॥ १४ ॥
स्वार्थे बुद्धिर्न चास्माकं, परार्थे त्यक्तजीवितान् ।
अस्मानप्यवमत्यैते स्वनाशाय समुद्यताः ॥ १५ ॥
न शृण्वन्ति हितं वाक्यं कृतघ्ना हिन्दवासिनः ।
स्वतन्त्राः ससुखाः सर्वे हठात्स्वाहितकारिणः ॥ १६ ॥
तान्वयं स्वमतोपायैर्निर्वर्तयितुमीप्सवः ।
विफले सामवचसि दण्डमप्युपयुञ्ज्महे ॥ १७ ॥
लोककल्याणकर्तृत्वं कठोरं व्रतमीदृशम् ।
तत्सिद्धये बतास्माकं नान्यः पन्थेह विद्यते ॥ १८ ॥ "
इत्येवं भाषमाणास्ते स्वराष्ट्रस्य हिते रताः ।
स्वार्थमावृत्य सौहार्दं दर्शयन्तो निरालसाः ॥ १९ ॥
युष्मत्कार्यविरोधाय यतमाना विचक्षणाः ।
राजशासनभङ्गस्य दोषं द्रक्ष्यन्ति सर्वतः ॥ २० ॥
कारागारेषु निक्षिप्य ततश्चाग्रेसरान्बहून् ।
दण्डभीतिं च युष्मासु स्थापयिष्यन्ति वै ततः ॥ २१ ॥
मुखेन शान्तिगीतानि पठन्तः सर्वतोमुखाः ।
करेण प्रहरिष्यन्तो न लज्जन्तीह ते जने ॥ २२ ॥
कार्यस्य मा विरामोऽस्तु त्यक्त्वा भीतिं यतव्रताः ।
राजशासनमेवैषां यतध्वं रोद्धुमग्रतः ॥ २३ ॥

सर्वतोऽप्येककालेन दृष्ट्वा लोकान्समुत्थितान् ।
शस्त्रैः प्राणापहरणे यतेरन्राज्यरक्षकाः ॥ २४ ॥
प्राणात्ययेऽप्यभीता वै यदा यूयं भविष्यथ ।
आक्रोशन्ति बहिष्काराद्यदैषां बान्धवा भृशम् ॥ २५ ॥
वाणिज्यवृत्तयश्चांग्ला हानिं दृष्ट्वा महत्तमाम् ।
स्वबान्धवानेव तदा उपदेक्ष्यन्ति सत्पथम् ॥ २६ ॥
तदैव केचित्समितावुदारा आंग्लपूरुषाः ।
पक्षमाश्रित्य चास्माकं भर्त्सयिष्यन्ति शासकान् ॥ २७ ॥
" स्वातन्त्र्यदानेऽप्यांग्लानां माहात्म्यं प्रथितं भवेत् ।
वशगाश्चापि वर्तेरन्सर्वे भारतवासिनः ॥ २८ ॥
त्यज्यतामविवेकोऽयं देशे शान्तिः प्रवर्त्यताम् ।
सुखं वै सामदानाभ्यां दण्डे हानिरनेकधा ॥ २९ ॥"
बुद्धिवादमिमं श्रुत्वा स्वकीयानां हितावहम् ।
कृतिं तदनुसारेण करिष्यन्तोऽधिकारिणः ॥ ३० ॥
भारतीयान्कतिपयान्समाहूय प्रयत्नतः ।
राष्ट्रस्थितिं समुद्दिश्य उपायांश्चिन्तयन्ति ते ॥ ३१ ॥
चर्चाकाले तु तत्रापि भेदो दृश्येत वै महान् ।
नैकमत्यं धुरीणानां स्वराज्यघटनां प्रति ॥ ३२ ॥
महात्मापि तदैवायं तत्र लोकैः स्मरिष्यते ।
मानेन बन्धनान्मुक्त आहूयेतांग्लसंसदि ॥ ३३ ॥
गत्वापि तत्र नैवाशा स्वराज्यस्य कदाचन ।
महंमदीया धूर्तानां वशगा वै विरोधिनः ॥ ३४ ॥
हिन्दीयेषु मिथो भेद आंग्लानां हितमावहेत् ।
इति ज्ञात्वापि समितौ विरोधो दृश्यते सदा ॥ ३५ ॥
उदारास्त्वांग्लनेतारो राष्ट्रे शान्तिमभीप्सवः ।

सर्वेषां हितमुद्दिश्य यत्किंचित्साधयन्ति ते ॥ ३६ ॥
तत्संतोषकरं नैव ह्यत्रत्यानां च कस्यचित् ।
असंतोषेण राष्ट्रस्य वृत्तिः सर्वत्र व्याकुला ॥ ३७ ॥
कारागृहान्मोचितोऽयं महात्मा मत्सुतः सुधीः ।
आंग्लैः समेतोऽपि मुदा कार्यलाभाय नो ध्रुवम् ॥ ३८ ॥
भेदेन जीवमानास्ते स्वकार्यकुशलाः सदा ।
तत्रापि भेदमुत्पाद्य समितिं घातयन्ति हि ॥ ३९ ॥
यावद्भेदं समाश्रित्य सर्वे वै हिन्दवासिनः ।
कलहे निरतास्तावत्परेषां लाभ एव हि ॥ ४० ॥
ऐक्यमेव प्रभवति नित्यं राष्ट्रोदयाय हि ।
तस्माद्यतध्वं राष्ट्रैक्ये मा भेदो घातकोऽस्त्विह ॥ ४१ ॥
एवमन्तेऽपि राष्ट्रस्य सिद्धिर्युष्मद्वशानुगा ।
सर्वेषां ऐक्यमेवेह कार्ये साधनमेष्यते ॥ ४२ ॥
राष्ट्रकार्यपरा बुद्धिः कर्तव्या त्यागशालिनी ।
कार्यसिद्धिश्च महती तामेव स्यात्समाश्रिता ॥ ४३ ॥

संजय उवाच ।

अन्तर्हिता ततो माता त्यागमुद्दिश्य तान्स्वयम् ।
भारतीयास्ततः सर्वे महात्मानमुपस्थिताः ॥ ४४ ॥

भारतीया ऊचुः ।

नष्टो मोहः स्मृतिर्लब्धा प्रसादात्तव व विभो ।
स्थिताः स्मो गतसंदेहाः करिष्यामो वचस्तव ॥ ४५ ॥
चालयास्मान्यथेच्छं त्वं त्यागोऽस्मासु विधीयताम् ।
प्रेरयास्मिन्महत्कार्ये न भीतिर्लेशतोऽपि नः ॥ ४६ ॥

संजय उवाच ।

यथा मात्रा भाषितं तत्तथा सर्वमभूत्किल ।

आदौ कारागृहे बद्धो महात्मा राजसेवकैः ॥ ४७ ॥
आंग्लामात्यनियोगेन पश्चात्तैरेव संमता ।
महात्मनो बन्धमुक्तिरांग्लेषु गमनं तथा ॥ ४८ ॥
ये तु तत्र समाहूताः स्वराज्यस्थापनार्थं[43] वै ।
तेषु सर्वत्र भेदोऽभूदैक्यं नाद्दश्यत क्वचित् ॥ ४९ ॥
पुनः प्रतिनिवृत्तोऽसौ महात्मापि स्वदेशगः ।
कारागृहे पुनर्बद्ध आंग्लशासनमीदृशम् ॥ ५० ॥
यदा तु घोषितं राष्ट्रे नवीनं राजशासनम् ।
तदा भेदकरा नीतिः सर्वत्र समदृश्यत ॥ ५१ ॥
अस्पृश्यानां पृथक्त्वेन निर्देशोऽत्र विशेषतः ।
असंमतो धुरीणानां महात्मा क्लेशितो भृशम् ॥ ५२ ॥
[44]प्रायोपवेशनपरः स्थितः कारागृहे तदा ।
अस्मदीया विभज्यन्ते धूर्तैर्धिगिति चाब्रवीत् ॥ ५३ ॥
यदा त्विदं महद् वृत्तं ज्ञातं सर्वैरपि प्रभो ।
तदा चिन्तातुराः सर्वे धुरीणा मिलिता जनाः ॥ ५४ ॥
तेषामग्रे तदा माता पुनराविर्बभूव ह ।
उग्ररूपधरा देवी क्लिश्यन्ती चान्तरा भृशम् ॥ ५५ ।

मातोवाच ।

ऐक्यमस्तु शुभं शीघ्रं सर्वेषां हिन्दवासिनाम् ।
इति हेतुं पुरस्कृत्य यततेऽयं चिरं सुधीः ॥ ५६ ॥
भेदो हि कलहस्यैव मूलमैक्यं सुखावहम् ।
इति सामान्यतस्तत्त्वमस्मदीयैर्न बुध्यते ॥ ५७ ॥
महंमदीयाश्चान्येऽपि पृथग्धर्मसमाश्रिताः ।
सुता मदीयाः सर्वे ते बान्धवा हिन्दवासिनः ॥ ५८ ॥
यूयं भेदैः समाक्रान्ताः कलहे च रताः सदा ।

येनांग्लानां सुखं राज्यं हिन्दभूमौ प्रवर्तते ॥ ५९ ॥
तन्न जानीथ दुर्भाग्यं किमितः स्यान्महत्तरम् ।
स्वकीयेष्वपि चास्पृश्या इति भेदः पुरस्कृतः ।
धूर्तास्तेन प्रमोदन्ते कलहं प्रेरयन्ति च ॥ ६० ॥
न प्राक्तनेषु धर्मेषु अस्पृश्यानां समुद्गमः ।
चत्वार एव वर्णा हि पञ्चमो नैव विद्यते ॥ ६१ ॥
वृत्तभेदाद्वर्णभेदः समाजे यदि दृश्यते ।
धर्मक्षेत्रे विरोधो न कर्तव्यः सर्वदा बुधैः ॥ ६२ ॥
स्वकीया एव एते वै पञ्चमा इति कीर्तिताः ।
मा तेषां दूरतस्त्याग ऐक्यस्य स विघातकः ॥ ६३ ॥
संहतौ देवयात्रायां स्पर्शस्तेषां न बाधकः ।
यूयं ज्येष्ठा हि विद्वांसो मा भेदं कुरुतेदृशम् ॥ ६४ ॥
धर्मो हि हृदयज्योतिः स्वयं चेज्ज्वलतेऽन्ततः ।
बाह्यस्पर्शः कथं तत्र भ्रंशयेत्तं शरीरतः ॥ ६५ ॥
तस्मात्सर्वे प्रयत्नेन एकीभवितुमर्हथ ।
ऐक्ये सिद्धे हि राष्ट्रस्य कोऽन्यस्तद्धर्षयिष्यति ॥ ६६ ॥
सनातनीयं धर्मस्य रीतिरुन्नतिकारिणी ।
समुन्नयति जीवन्तं यतमानं परं पदम् ॥ ६७ ॥
मा वः संशयलेशोऽत्र धर्महानिर्न वै क्वचित् ।
महात्मनोऽनुसारेण वर्तयध्वमतन्द्रिताः ॥ ६८ ॥

संजय उवाच ।

एवं संत्रोद्यमानास्ते धुरीणाः सर्वतस्तदा ।
सर्वेषामैक्यमुद्दिश्य प्रयत्नं चक्रिरे भृशम् ॥ ६९ ॥
अस्पृश्य इति नामापि न श्रूयेत यथा तथा ।
तेषां समुद्यमं दृष्ट्वा महात्मा मुदितोऽभवत् ॥ ७० ॥

सर्वे हरिजना एते बान्धवा हिन्दुधर्मिणः ।
विष्णुभक्ताश्च सन्तश्च राष्ट्रस्य हितकारिणः ॥ ७१ ॥
महंमदीयाश्च तथा मातुरुद्धारमीप्सवः ।
धुरीणैः संगताः सर्वे[४५] प्रयागे चैक्यमानसाः ॥ ७२ ॥
एवं सर्वत्र राष्ट्रैक्यं घुष्यमाणं समुज्ज्वलम् ।
श्रुत्वापि राज्यकर्तृणां मतिर्भ्रान्ता न वै तदा ॥ ७३ ॥
कुटिलां नीतिमालम्ब्य प्रजाभेदं चिकीर्षवः ।
न मन्यन्ते धुरीणांस्ते निजशासनमानिनः ॥ ७४ ॥

॥ इति श्रीगान्धीगीतायां मात्रादेशयोगो नाम
अष्टादशोऽध्यायः ॥ १८ ॥

अथ एकोनविंशोऽध्यायः ।

संजय उवाच ।

मोहान्धस्त्वं महाराज याथातथ्यं न पश्यसि ।
धृतं राष्ट्रं त्वदीयैस्तेऽप्यन्धा राज्यमदादिह ॥ १ ॥
इदानीं कालमाहात्म्यात्कृपया चेश्वरस्य वै ।
यथार्थदर्शी लोकोयं जातः सत्पथमाश्रितः ॥ २ ॥
स्वहितं च समुद्दिश्य यतमानः प्रदृश्यते ।
अचिराद् भारतीयास्ते स्वातन्त्र्यसुखमाप्नुयुः ॥ ३ ॥

धृतराष्ट्र उवाच ।

मैवं वद महाभाग कुशला राजकर्मणि ।
मदीया भेदमाश्रित्य चिरं स्थास्यन्ति भारते ॥ ४ ॥
हिन्दुमुस्लीमयोरैक्यं न कदापि भविष्यति ।
तेन स्वातन्त्र्यलाभश्च कस्यापि सुलभो न हि ॥ ५ ॥

यावद्भेदो भवेल्लोके तावदांग्ला यशस्विनः ।
स्वार्थं संसाधयन्तीह विरोधस्तत्र दुर्बलः ॥ ६ ॥
महात्मनः प्रयत्नानां वैफल्यं भेदकारणात् ।
आंग्लानां च सुखावाप्तिरसुखं हिन्दवासिनाम् ॥ ७ ॥

संजय उवाच ।

यदेतदुच्यते राजंस्तत्सत्यं सर्वथा किल ।
सर्वेषामैक्यभावाय महात्मा यतते सदा ॥ ८ ॥
तथापि भारतीयेषु न सिद्धिर्दृश्यते क्वचित् ।
मुस्लीमानां विरोधेन कार्यघातः सुनिश्चितः ॥ ९ ॥
भेदप्रस्थापनार्थाय जिनाप्रभृतिभिर्यदा ।
स्थापितैव पृथक्त्वेन मुस्लीमसमितिः[४६] स्वयम् ॥ १० ॥
तत्रैषां संमतं तत्त्वमनर्थानां च कारणम् ।
स्वीकृतं प्रकटं सर्वैः समितौ प्रथमं तदा ॥ ११ ॥
भिन्नो धर्मस्तथाचारो मुस्लीमानां यथा तथा ।
तेषामैक्यं हिन्दुभिः स्यादशक्यं बत सर्वथा ॥ १२ ॥
सर्वेऽऽप्येते भारतीया बान्धवा इति यज्जने ।
गान्धीप्रभृतिभिश्चोक्तं तन्न सत्यं कदाचन ॥ १३ ॥
अशिक्षिता हि बहवो मुस्लीमेषु दरिद्रिताः ।
वञ्चनायैव राष्ट्रैक्यं तेषां स्यान्नात्र संशयः ॥ १४ ॥
एवमुद्घोषयन्तस्ते चांग्लानामुपकारकाः ।
स्वीकृताः स्वागतेनैव मुदितै राज्यशास्तृभिः ॥ १५ ॥
यद्यद्राष्ट्रसभा ब्रूयात्संमतं राष्ट्रवर्धनम् ।
तत्र तत्र विरोधोऽभून्मुस्लीमानां हितावहः ॥ १६ ॥
अत्रान्तरे राज्ययन्त्रे नवीना घटना[४७] कृता ।
आंग्लै राष्ट्रप्रभेदाय याभवत्कलहाय च ॥ १७ ॥

हिन्दवो बहुसंख्याका मुस्लीमाश्चाल्पसंख्यकाः ।
तथापि मा भूदन्यायो मुस्लीमेष्विति हेतुना ॥ १८ ॥
बाहुल्यं संमतं तेषां सर्वराजसभासु वै ।
तथा नियोजनं चापि ह्यधिकारपदेष्विह ॥ १९ ॥
एवं कृतेऽप्यसंतोषो मुस्लीमैर्बहु दर्शितः ।
यद्दत्तं गृह्यते ह्यादावधिकं प्रार्थ्यते ततः ॥ २० ॥
असंतुष्टाः सदाप्येवं राष्ट्रे दोषैकदृष्टयः ।
सर्वैर्विरोधं कुर्वान्ति भाषन्ते स्वार्थहेतुना ॥ २१ ॥
न राज्यकर्तृभिस्तेषां सहकारः कथंचन ।
नापि राष्ट्रसभायोगो माहात्म्यं स्वस्य संमतम् ॥ २२ ॥
लोकप्रतिनिधित्वेन मन्त्रिणः प्रान्तशासने ।
नियोक्तव्या इति मतं घटनायां पुरस्कृतम् ॥ २३ ॥
राष्ट्र्यास्तदुरीकृत्य गान्धिना प्रेरिताः स्वयम् ।
प्रान्ते प्रान्ते मन्त्रिपदे नियुक्ता अभवन्किल ॥ २४ ॥
यथान्यायं लोकहिते तत्पराः सर्व एव हि ।
स्वकर्तव्ये प्रसक्तास्ते दृश्यन्ते लोकनायकाः ॥ २५ ॥
मुस्लीमास्तेष्वपि ह्यासन्राष्ट्र्या बुद्धिमत्तराः ।
किं तु जीनाप्रभृतयः संतोषं तत्र नाप्नुवन् ॥ २६ ॥
गान्धी राष्ट्रसभा चापि हिन्दूनां हितकारिणी ।
मुस्लीमानां कष्टतमं जीवनं जायतेऽधुना ॥ २७ ॥
स्वधर्माचरणेऽप्येषां विरुद्धा हिन्दुमन्त्रिणः ।
अन्यायस्य परा सीमाप्येषेत्युद्घोषयन्ति ते ॥ २८ ॥
स्वतोऽप्यकिंचित्कुर्वाणास्तत्परा दोषदर्शने ।
महत्त्वमाप्नुवभूमावांग्लेभ्यो राजकारणे ॥ २९ ॥
॥ इति श्रीगान्धीगीतायां मुस्लीमविरोधयोगो नाम
एकोनविंशोऽध्यायः ॥ १९ ॥

अथ विंशोऽध्यायः ।

संजय उवाच ।

अत्रान्तरे युरोपीयैः[४८] प्रस्तुतं भीषणं रणम् ।
शार्मण्यैः[४९] सह संयोद्धुं सज्जा आंग्लादयोऽभवन् ॥ १ ॥
नेता हिटलराख्योऽसौ शार्मण्यानां प्रतापवान् ।
कलहाय समुद्युक्तो न बिभेति कुतश्चन ॥ २ ॥
प्रथमे तु महायुद्धे शार्मण्याः सुपराजिताः ।
नापश्यन्शरणं कंचित्तेभ्यः सर्वं हृतं परैः ॥ ३ ॥

ततः प्रभृति राष्ट्रस्य पुनरुद्धारहेतुना ।
यतितं बहुभिस्तेषु हिट्लरोऽभवदग्रणीः ॥ ४ ॥
निर्मिता युद्धकुशलाः स्वकीयास्तेन सर्वतः ।
वैभवं सर्वमप्येवं प्राप्स्याम इति निश्चयात् ॥ ५ ॥
बलं बलवतां चापि वर्धते सुतरां दृढम् ।
इति चेतसि मन्वानो नेता साहसिकोऽभवत् ॥ ६ ॥

आक्रान्ता इतरे देशाः शार्मण्यैः क्रमशस्तदा ।
कलहो मास्तु कुत्रापीत्यांग्लैर्यत्नो महान्कृतः ॥ ७ ॥
यदा त्वभ्यधिका तृष्णा तथोन्मादोऽप्यदृश्यत ।
मुसोलिनीहिट्लरयोर्मैत्री चापि दृढा कृता ॥ ८ ॥
यदा रूसेन[५०] संगम्य पोलंडीयाः पराजिताः ।
आंग्लशार्मण्ययोरेव युद्धमुद्घोषितं तदा ॥ ९ ॥
आंग्लानां पक्षपातेन हॉलण्डफ्रान्सबेल्जमाः ।
सर्वे शत्रुविरोधाय युद्धभूमौ समागताः ॥ १० ॥
एवं प्रवर्तितं युद्धमन्येषामपि तापदम् ।
विश्वमप्यचिरात्तेन व्याप्तं नास्त्यत्र संशयः ॥ ११ ॥
आंग्लानां भारते राज्यं तेषामेव हिताय तत् ।

राजप्रतिनिधिश्चापि तेषामादेशकार्यसौ ॥ १२ ॥
तेन चैषां मतं ज्ञात्वा स्वीकृता युद्धघोषणा ।
देशे सर्वत्र संपाद्य युद्धोपकरणानि च ॥ १३ ॥
युद्धाय प्रेषितास्तेन सैनिकाश्च सहस्रशः ।
आहूताः सर्वतो राष्ट्रे युद्धायैव ततोऽधिकाः ॥ १४ ॥
आदौ लोकमतं ज्ञात्वा पश्चाद्युद्धस्य घोषणम् ।
तद्विरुद्धं प्रतिनिधिर्वर्तते तन्न संगतम् ॥ १५ ॥
युरोपीयेषु यद्युद्धं संबंधस्तत्र को हि नः ।
जीवहानिर्वृथैवैषा मास्त्वशान्तिर्भयावहा ॥ १६ ॥
इति राष्ट्रसभायां यद्धुरीणैः सुविचारितम् ।
महात्मनापि तत्सर्वं स्वीकृतं हितबुद्धिना ॥ १७ ॥
स्वकीयानां घात एव युद्धेनात्र भविष्यति ।
तन्मास्तु शासनपदमित्यादिष्टं महात्मना ॥ १८ ॥
सद्यस्तदनुरोधेन ये त्वासंल्लोकमन्त्रिणः[५१] ।
स्वपदं तैः परित्यक्तंमांग्ला भीतास्तथापि न ॥ १९ ॥
साहाय्यार्थं स्वकीयानां प्रयतन्ते यथाक्रमम् ।
युद्धोपकरणानीह चोत्पाद्यन्ते सहस्रशः ॥ २० ॥
यद्यप्यसंतोषपरा भाषा यांग्लविरोधिनी ।
मुस्लीमानां तथाप्यासीत्साह्यं युद्धाय सर्वतः ॥ २१ ॥
तथैव राष्ट्रे सर्वत्र दरिद्राश्च कुटुम्बिनः ।
आसंस्तेऽप्युदरार्थाय युद्धसाह्यं प्रकुर्वते ॥ २२ ॥
तावच्छार्मण्यदेशीयैराक्रान्तं शात्रवं बलम् ।
विश्वजेता हिटलरो वशे सर्वान्करोति ह ॥ २३ ॥
पूर्वसागरभागेऽपि जपानीया जिगीषवः ।
जित्वा द्वीपानि बहुशो देशांश्चापि ततोऽजयन् ॥ २४ ॥

तत्रत्या ये युरोपीया न पर्याप्ता बलेन ते ।
तस्मात्प्रपूर्वदिग्भागो जपानीयैर्वशीकृतः ॥ २५ ॥
आक्रान्तो ब्रह्मदेशस्तैर्भारतं धर्षयन्ति ते ।
भीताश्चांग्लास्ततो यत्नं स्वयं कर्तुं समुद्यताः ॥ २६ ॥
प्रेषितः[५२] क्रिप्स्महाभागः प्रशमाय हिताय च ।
राष्ट्रियास्तेन नेतार आहूता भारते तदा ॥ २७ ॥
स्वातन्त्र्यं च स्वराज्यं च दास्यतेऽप्यचिरात्किल ।
युद्धसाह्योद्यतैरादौ संपाद्यो विजयो महान् ॥ २८ ॥
इदं स्वीकार्यमद्यैव यतमानैश्च नेतृभिः ।
इति प्रतिनिधेर्वाक्यं विचाराय प्रवर्तितम् ॥ २९ ॥
राष्ट्रियाश्च वदन्त्येव ह्यांग्ला मिथ्याप्रवादिनः ।
जपानभीत्येदं सर्वं प्रस्तुतं न तु संगतम् ॥ ३० ॥
वदन्ति मधुरां वाचमस्यामापदि यद्यपि ।
विश्वासो नैव कर्तव्यो न सुखाय कदाचन ॥ ३१ ॥
अस्मिन्स्वातन्त्र्यदानेऽपि बीजं भेदस्य धिष्ठितम् ।
कलहो येन राष्ट्रे स्यादस्वास्थ्यमपि सर्वदा ॥ ३२ ॥
इत्येवं प्रवदद्भिस्तैः क्रिप्स्वाक्यं धिक्कृतं तदा ।
आंग्ला अपि महाधूर्ता निराशा नाभवन्क्वचित् ॥ ३३ ॥
अमेरिकासभाध्यक्षो रूझवेल्टेति विश्रुतः ।
स तेषां वशगो भूत्वा साहाय्यं कुरुते रणे ॥ ३४ ॥
तथैव रूसशार्मण्यावुभावपि वियोजितौ ।
उभयोर्दारुणं युद्धं प्रावर्तत जिगीषया ॥ ३५ ॥
तेन रूसस्य साहाय्यमांग्लानामभवत्तदा ।
शार्मण्याः सर्वतो ग्रस्ताः कर्तव्या इति निश्चयात् ॥ ३६ ॥
एवं जयाशा युध्यद्भिरांग्लैर्दृष्टा यदा शुभा ।

भारतीयास्तदैवैभिः सर्वत्राप्यवहेलिताः ॥ ३७ ॥
उद्घोषयन्ति सर्वत्र स्वकीयं न्यायपालनम् ।
तदेवान्यायसंपूर्णमेवमासीत्सुदारुणम् ॥ ३८ ॥
संतापितो महात्मापि मार्गं युक्तं परीप्सति ।
अहो दम्भश्च दर्पश्च शासकानामितीरयन् ॥ ३९ ॥
यद्यस्माकं सुखायैव यत्नं कुर्वन्त्यतन्द्रिताः ।
तत्कथं न वयं शक्ता अद्यापि स्वत्त्वरक्षणे ॥ ४० ॥
तदलं सर्वथा ह्येषामुपकारो भयावहः ।
गच्छन्तु[53] सर्वे त्वरिताः स्वदेशायैव सांप्रतम् ॥ ४१ ॥
मुस्लीमा यदि गृह्णीरन्राज्ययन्त्रं स्वतस्तदा ।
मास्त्वांग्लानां तत्र चिन्ता लोकरक्षणवादिनाम् ॥ ४२ ॥
प्रियमस्माकमेकं यत्त्याज्यं राज्यं विदेशजैः ।
यद्भावि तद्भवतु नः सर्वं सोढुं वयं क्षमाः ॥ ४३ ॥
राष्ट्रियाश्चापि मिलिता मुम्बापुर्यामनेकशः[54] ।
महात्मनो वचांसीह संमतानीति तेऽब्रुवन् ॥ ४४ ॥
' करेंगे या मरेंगे ' इत्यभिमन्त्र्य स्वकैः सह ।
यावत्प्रचलितः स्थानात्तावदेव निरोधितः ॥ ४५ ॥
देशे सर्वेऽपि नेतारो राजदूतैः समुद्यतैः ।
अज्ञाता एव लोकस्य कारागारे वशीकृताः ॥ ४६ ॥
तेन सर्वत्र लोकस्य संक्षोभो जनितो महान् ।
राज्ययन्त्रविरोधाय बहवश्च सुसज्जिताः ॥ ४७ ॥
तेषां दण्डप्रशमने तत्परा राजसेवकाः ।
सर्वमल्पेन कालेन शमितं प्रसभं हठात् ॥ ४८ ॥
महात्मा संन्निरुद्धोऽपि नैव शान्तः कथंचन ।
तत्र दैववशात्तस्य भार्या[55] साध्वी मृता तदा ॥ ४९ ॥

सर्वदा सर्वकार्येषु सा पत्युः सहचारिणी ।
मातेव राष्ट्रे सर्वत्र संमता वंदिता जनैः ॥ ५० ॥
पत्नीनिधनयोगेन सोऽधिकं व्यथितोऽभवत् ।
लोका अप्यनुशोचन्ति दृष्ट्वावस्थां दुरावहाम् ॥ ५१ ॥
॥ इति श्रीगान्धीगीतायां बन्धनयोगो नाम विंशोऽध्यायः ॥ २० ॥

अथ एकविंशोऽध्यायः ।

संजय उवाच ।

अत्रान्तरे सुबह्वीषु देशे लोकसभासु च ।
कारावासो महात्मादिराष्ट्रियाणां निषेधितः ॥ १ ॥
राष्ट्रियैरेव लोकानां संक्षोभो जनितो भृशम् ।
ईतीरितो वृथारोपो नेतृष्वेतैः प्रशासकैः ॥ २ ॥
तत्रापि प्रत्ययो नास्ति सर्वं द्वेषकृतं परम् ।
राजप्रतिनिधिश्चापि सम्यगुक्तः समञ्जसैः ॥ ३ ॥
ततो दीर्घेण कालेन मुक्तो निगडबन्धनात् ।
महात्मा राष्ट्रकार्यार्थं संसिद्धः पुनरेव च ॥ ४ ॥
मुस्लीमानां विरोधेनैवांग्ला उत्तेजिता बहु ।
तत्रापि यतितं तेन सर्वं जातं वृथैव तत् ॥ ५ ॥
जिनाप्रभृतयस्तत्र नैव शृण्वन्ति तद्वचः ।
राष्ट्रभेदाय संसिद्धाः स्वमतं न त्यजन्ति ते ॥ ६ ॥
मुस्लीमानां हितार्थाय पाकिस्तानस्य निर्मितिः ।
इत्याग्रहोऽपि बलवान्स्वीकृतश्च जिनादिभिः ॥ ७ ॥
एवं तेषां राज्यतृष्णा वर्धते सा दिने दिने ।
विरोधस्तत्र सुस्पष्टो राष्ट्रियाणां समञ्जसः ॥ ८ ॥

हिमशैलात्सागरान्तमखण्डं सृष्टिनिर्मितम् ।
विस्तीर्णं भारतं वर्षमेकात्म्यमपि तत्र हि ॥ ९ ॥
विभज्यते यदि त्वेतत्तन्न लोकहितावहम् ।
सर्वे विभिन्नधर्मीयास्तिष्ठन्त्वेकत्र भारते ॥ १० ॥
इति वादो राष्ट्रियाणां धूर्तैरांग्लैरनेकशः ।
मुस्लीमान्कारणं कृत्वा सर्वदैव निराकृतः ॥ ११ ॥
एवं विवदमानेषु राज्ययन्त्रप्रचालने ।
साह्यं कुर्वन्ति नो लोकास्तदांग्लैः स्ववशे कृतम् ॥ १२ ॥
यत्र यत्र च नेतारो विरुध्यन्ते प्रशासकैः ।
तत्र घोरतमो दण्डो लोकेषु स्यात्सुनिश्चितः ॥ १३ ॥
समस्ते भारते वर्षे धनधान्यसमृद्धिमान् ।
वङ्गदेशः सुविख्यातस्तत्रैवापतिता विपत् ॥ १४ ॥
अवर्षणात्सस्यहानिर्धान्याभावाद् बुभुक्षुता ।
अनेकशतसाहस्रा जना मृत्युवशं गताः ॥ १५ ॥
तत्रत्या लोकनेतारः सुभाषाद्या अनेकशः ।
दण्ड्याः सर्वाः प्रजाश्चेति शास्तॄणां मतमुत्तमम् ॥ १६ ॥
तस्मात्तदनुसारेण प्रजानाश उपेक्षितः ।
राज्यकर्तृभिरप्येवं दण्ड्यन्ते भारते जनाः ॥ १७ ॥
युद्धेऽपि यावत्संजातं मैत्रं रूसांग्लयोर्दृढम् ।
तावत्सर्वत्र दृश्यन्ते शार्मण्यानां पराभवः ॥ १८ ॥
अणुप्रहरणास्त्रेण जपानीया निपातिताः ।
भीत्याक्रान्तं जगच्चापि मूढं युक्तविचारणे ॥ १९ ॥
तदैव रूसैः संगत्य चाक्रान्ताः सर्वतोदिशः ।
शार्मण्यास्त्यक्तजीवाशाः शरणं प्रतिपेदिरे ॥ २० ॥
नष्टो हिटलरश्चापि नष्टा अनुचरास्तथा ।

वृथा विश्वजिगीषापि नष्टा स्मृतिपथं गता ॥ २१ ॥
द्वितीयेऽपि महायुद्धे यशो लब्ध्वैवमन्ततः ।
आंग्लाः साहाय्यकैः सार्धं प्रतिष्ठामपि चाप्नुवन् ॥ २२ ॥
किं तु राष्ट्रबलं तेषां प्रायो विकलतां गतम् ।
दूरैव वार्ता पूर्वस्य वैभवस्य तदाभवत् ॥ २३ ॥
धान्यं नास्ति धनं नास्ति नास्ति स्वास्थ्यं च कस्यचित् ।
तथाप्यांग्लैर्धैर्यशीलैः सोढं सर्वं सुदुःसहम् ॥ २४ ॥
ऋणमाँस्त्रकदेश्यानामांग्लैर्देयं तथाब्जशः ।
उभयोः संगतं तेन सहजं चाभवत्तदा ॥ २५ ॥
युद्धोत्तरव्यवस्थायां जितराष्ट्रस्य संग्रहः ।
तथैव लघुराष्ट्राणामैक्येन बलवर्धनम् ॥ २६ ॥
इमं विषयमुद्दिश्य विचाराय प्रवर्तिताः ।
यदा मिलित्वा जेतारस्तदा द्वैधं प्रदृश्यते ॥ २७ ॥
आंग्लास्त्रकविरोधाय रूज्जा रूसाः स्वकैः सह ।
युरोपीयेषु पौर्वात्या ह्यासन्रूसानुयायिनः ॥ २८ ॥
दृष्ट्वैवं च समुत्पन्नं संघर्षं राष्ट्रनेतृषु ।
पुनर्युद्धस्य विषये संजातः संशयो महान् ॥ २९ ॥
आस्तां परेषां वार्तेयं किं जातं भारते पुनः ।
तदेवात्र प्रपश्यामोऽभिप्रेतं तद्धि सांप्रतम् ॥ ३० ॥
राष्ट्रिया बन्धने युक्तास्तावदेव जिनादयः ।
प्रयत्नं कृतवन्तस्ते संगन्तुं राज्यकर्तृभिः ॥ ३१ ॥
नियोज्या मुस्लिमाः सर्वे वयं मन्त्रिपदेष्विह ।
साहाय्यं कर्तुमिच्छामो राज्यशासनकर्मणि ॥ ३२ ॥
तथापि राष्ट्रियांस्त्यक्त्वा केवलैर्मुस्लिमैः सह ।
दुष्करं कार्यमित्येव मतमांग्लैः प्रदर्शितम् ॥ ३३ ॥

तेनाधिकतरो रोषो मुस्लीमानां च हिन्दुषु ।
घाताय सर्वथा युक्ता राष्ट्रकार्यस्य ते तदा ॥ ३४ ॥
यदा तु राष्ट्रियाः सर्वे विमुक्ता गान्धिना सह ।
तदैव मुस्लिमैरैक्यं कर्तुं यत्नो महान्कृतः ॥ ३५ ॥
न हितं श्रुतवन्तस्ते वयं श्रेष्ठाः पराक्रमे ।
मुस्लीमानां च साम्राज्यमिष्टं न इति वादिनः ॥ ३६ ॥
यत्रैषां बहुसंख्यत्वं तत्र युक्तं स्वशासनम् ।
यत्राल्पसंख्यास्तत्रापि तेषामेव हिताय तत् ॥ ३७ ॥
एवं किमप्ययुक्तं तन्न मतं कस्यचिद्भवेत् ।
तथाप्युक्तैर्जिता धूर्ता राष्ट्रियैरैक्यवादिभिः ॥ ३८ ॥
अधिकाधिकमिच्छन्ति स्वातन्त्र्यं राज्यकर्मसु ।
स्वहिताय सदोद्युक्ताः परघाताय चोद्यताः ॥ ३९ ॥
एवं वैषम्यमस्वास्थ्यं राष्ट्रे तैः संप्रवर्तितम् ।
न शान्तिर्हृदये चासीत्कस्यापि सुखकारिणी ॥ ४० ॥
तथाप्यांग्लप्रतिनिधिः कथंचिद्राष्ट्रियैः सह ।
राज्यव्यवस्थामकरोन्मुस्लीमानां हिताय या ॥ ४१ ॥
अखण्डं भारतं वर्ष तिष्ठत्विति मनीषया ।
सर्वं तत्स्वीकृतं यद्यप्यन्याय्यं लोकशासनम् ॥ ४२ ॥
मुस्लीमानां राष्ट्रियाणां समा संख्या हि मन्त्रिषु ।
तथा तेष्वन्यपक्षीयाः समाविष्टाश्च केचन ॥ ४३ ॥
तथापि नैव संतोषो जिनादीनां कथंचन ।
तत्पक्षीया निरुन्धन्ति सर्वकार्येषु सर्वदा ॥ ४४ ॥
पाकिस्तानस्य संप्राप्ती राष्ट्रे सर्वत्र खण्डशः ।
इत्येव तेषामुद्घोषः स्वातन्त्र्यं चैव शासने ॥ ४५ ॥
यावन्न प्राप्यतेऽस्माकमुद्दिष्टं राष्ट्रखण्डनम् ।

[५]प्रतिकुर्मस्तावदेव सभासु प्रवदन्ति ते ॥ ४६ ॥
तत्रापि तेषां कौटिल्यं सुस्पष्टं दृश्यते जनैः ।
तदेवात्महितार्थाय शासकैरुपयुज्यते ॥ ४७ ॥
एषां वाग्राज्यकर्तृणां विरुद्धा नो कृतिस्तथा ।
हिन्दूनामेव नाशार्थं यतन्ते सर्वदा हि ते ॥ ४८ ॥
तथाचिराच्च मुस्लीमैर्हत्याकाण्डं प्रवर्तितम् ।
वङ्गेषु प्रथमं यत्र तेषामेवानुशासनम् ॥ ४९ ॥
राजधान्यां तथान्यत्र ग्रामेषु नगरेषु च ।
हिन्दूनां क्रियते हिंसा सर्वस्वहरणं तथा ॥ ५० ॥
स्त्रीणां विडम्बनं तासामुपभोगो बलात्कृतः ।
तथा धर्मान्तरं चापि सीमा क्रौर्यस्य या परा ॥ ५१ ॥
निर्दयैस्तत्र हन्यन्ते बालवृद्धातुरा अपि ।
गृहाणि चैव दह्यन्ते ह्रियतेऽपि धनं बहु ॥ ५२ ॥
मुस्लीमा मन्त्रिणो वङ्गे शासका अनुचारिणः ।
सर्वत्र निभृतं प्रान्ते यथाकामं चरन्ति ते ॥ ५३ ॥
तथैवान्यप्रदेशेषु घातिता हिन्दवो बहु ।
प्रतिकारस्तु तत्रापि निरुद्धो राज्यशासकैः ॥ ५४ ॥
व्यथितोऽभून्महात्मासौ दृष्ट्वा हत्यां सुदारुणाम् ।
प्रार्थिता लोकनेतारो मैवमित्यभिभाषिणा ॥ ५५ ॥
यदा त्वांग्लैः स्वदेशेऽपि श्रुतं वृत्तं सविस्तरम् ।
तदा राजप्रतिनिधिर्निन्दितो बहुशो जनैः ॥ ५६ ॥
गतः स्वदेशं वेव्हेल[५१]स्तदन्यः स्थानभाक् कृतः ।
मांटबाटन नामासौ राज्ञश्चाप्तस्तथा सुधीः ॥ ५७ ॥

॥ इति श्रीगान्धीगीतायां मुस्लीमाभियोगो नामैकाविंशोध्यायः ॥ २१ ॥

अथ द्वाविंशोऽध्यायः ।

धृतराष्ट्र उवाच ।

मुस्लीमानामेव पुरा साम्राज्यं भारते ह्यभूत् ।
स्थापिता हिन्दवस्तैश्च दासभावे वशीकृताः ॥ १ ॥
तथापि ते यथाकालं प्रतिकाराय तत्पराः ।
मुस्लीमांश्च पराभूय स्वातन्त्र्यं पुनराप्नुवन् ॥ २ ॥
राजपूता मध्यदेशे महाराष्ट्रेऽपि हिन्दवः ।
सर्वत्र भारते वर्षे दृश्यन्ते युद्धतत्पराः ॥ ३ ॥
सर्वेष्वेतेषु चतुरैरांग्लैः संपाद्य शासनम् ।
समग्रं भारतं वर्षमचिरात्स्ववशे कृतम् ॥ ४ ॥
यदद्य भारतस्यापि स्वातन्त्र्यं दातुमुद्यताः ।
तदौदार्यं किलांग्लानां स्तुतिमर्हन्ति तत्र ते ॥ ५ ॥

संजय उवाच ।

तत्रैव स्थिरमात्मीयं शासनं वै चिकीर्षवः ।
मिथो भेदं च कलहं यत्नतः प्रेरयन्ति ते ॥ ६ ॥
कुटिला नीतिरप्येषा भारतेऽभूद्यशस्विनी ।
आंग्लानां शासनं सर्वैर्भारतीयैः सुसंमतम् ॥ ७ ॥
यद्राष्ट्रियैर्विरोधाय मुस्लीमाः सततोत्थिताः ।
राष्ट्रस्य खण्डने सक्तास्तदप्यांग्लस्य कारितम् ॥ ८ ॥
तस्यैव परिपाकोऽयं यद्धिन्दूनां विहिंसकाः ।
मुस्लीमाश्च परां कोटिं क्रूरताया गता इह ॥ ९ ॥
न युक्तिवादं शृण्वन्ति पाकिस्तानजिगीषवः ।
धर्मभूमिरियं तैश्च सर्वथा विकलीकृता ॥ १० ॥
सर्वेषां संमतं पूर्वं मोतीलालजिनादिभिः ।
यत्प्रस्तुतं देशकार्यं तदिदानीं सुविस्मृतम् ॥ ११ ॥

पाकिस्तानं विना शान्तिर्देशे नैव भवेत्कचित् ।
वदन्ति प्रकटं लोके मुस्लीमास्ते जिनादयः ॥ १२ ॥
आंग्लानां प्रमुखास्तेन विचाराय प्रवर्तिताः ।
पुनरागत्य देशेऽत्र धुरीणैः संलपन्ति च ॥ १३ ॥
राष्ट्रस्य त्रिविधाः खण्डाः करणीयाः प्रयत्नतः ।
इति संप्राप्तमत्रैव परमं संकटं तदा ॥ १४ ॥
मुस्लीमानां हितार्थाय पाकिस्तानस्य निर्मितिः ।
यत्रैषां बहुसंख्यत्वं तत्र राष्ट्रस्य खण्डनम् ॥ १५ ॥
तथैवानेकसामन्तास्तत्र तत्र प्रशासकाः ।
तेषामपि यथाकामं स्वातन्त्र्यं स्वयमागतम् ॥ १६ ॥
शिष्टो भागो राष्ट्रियाणां तत्राप्यैक्यं न कुत्रचित् ।
तत्रत्या मुस्लीमाः प्रायो जिनादीननुसारिणः ॥ १७ ॥
एवं चेयं मातृभूमिर्बहुधा शकलीकृता ।
संतोषाय न कस्यापि तैरांग्लैर्घटकैर्विना ॥ १८ ॥
स्वातन्त्र्यं तादृशं राष्ट्रे यत्प्राप्तमनया धिया ।
अन्यां गतिमपश्यद्भिः कथंचिदपि संमतम् ॥ १९ ॥

॥ इति श्रीगान्धीगीतायां राष्ट्रखण्डनयोगो नाम द्वाविंशोऽध्यायः ॥ २२ ॥

अथ त्रयोविंशोऽध्यायः ।

संजय उवाच ।

कलहो मास्तु शान्तिः स्याद्राष्ट्रे इत्येव हेतुना ।
यत्स्वीकृतं राष्ट्रियैस्तदनर्थायैव भावितम् ॥ १ ॥
महात्मनः संमता ये हिन्दराष्ट्रस्य मंत्रिणः ।
साम्येन सर्वं पश्यन्तो न च्युता स्वीकृताद्व्रतात् ॥ २ ॥

आंग्ल एवास्तु हिन्दस्य कंचित्कालं प्रशासकः ।
इति हेतोः प्राक्तनोऽसौ बाटनः संनियोजितः ॥ ३ ॥
सर्वतन्त्रस्वतन्त्रश्च पाकिस्तानप्रशासकः ।
जिनाभवत्तमेवासन्ननुकूलाश्च मन्त्रिणः ॥ ४ ॥
साम्यं सर्वत्र पाकेऽत्र पक्षपातो न कस्यचित् ।
मुखेनैवं वदन्त्येते कृतिस्तु सुविरोधिनी ॥ ५ ॥
हिन्दूनां त्रासजननं भवत्येषां प्रशासनम् ।
अचिरादेव नाशाय तेषां तत्कल्पितं हठात् ॥ ६ ॥
हिन्दवः स्वल्पसंख्यास्ते पीडिताः सर्वथाचिरात् ।
नापश्यञ्शरणं कंचित्स्थातुं शक्ता न तत्र वै ॥ ७ ॥
आदौ वङ्गेषु या हिंसा ततोऽपि भयकारिणी ।
हिंसा प्रवृत्ता पंजाबे घातिताश्चैव लक्षशः ॥ ८ ॥
कुटुंबीया हता बाला वृद्धा नष्टं धनं तथा ।
गृहाण्यपि प्रदग्धानि मानव्यं नष्टमेव च ॥ ९ ॥
सर्वं त्यक्त्वा प्रधावन्ति प्राणत्राणपरायणाः ।
हिन्दवस्तेऽपि वध्यन्ते मार्गे मुस्लीमबान्धवैः ॥ १० ॥
शीखानामपि सर्वत्र विध्वंसः सुमहान्कृतः ।
पूजास्थानानि धर्म्याणि ध्वस्तानि सुबहूनि च ॥ ११ ॥
सिन्धुदेशेऽप्येवमेव हिन्दूनां कृपणा स्थितिः ।
निर्वासिताः पलायन्ते हिन्दभूमिं सहस्रशः ॥ १२ ॥
हिन्दराष्ट्रेऽपि मुस्लीमाः पाकिस्तानहितैषिणः ।
उद्युक्ता राष्ट्रघाताय न ज्ञातं कपटं तदा ॥ १३ ॥
तैरेव नानाशस्त्राणि युद्धोपकरणानि च ।
सुगूढं प्रेषितानीह बाह्यतः प्रीतिदर्शकैः ॥ १४ ॥
राष्ट्रे सर्वत्र मुस्लीमाः सुखेन विचरन्ति ते ।

न केऽपि तैर्विरुध्यन्ते स्वकीयत्वेन संमतैः ॥ १५ ॥
पाकिस्ताने तु सर्वत्र भीषिता हिन्दवस्तदा ।
निःसारिताः स्वतः सर्वे मुस्लीमैर्बलवत्तरैः ॥ १६ ॥
एवं सत्यपि सर्वत्र पाकिस्तानप्रशासकाः ।
हिन्दूञ्शीखान्दूषयन्ति बन्धूनां हिंसका इति ॥ १७ ॥
महत्यापतिता राष्ट्रे संकटानां परंपरा ।
महात्माप्यवदद्धा! धिक् कष्टं ! स्वातन्त्र्यमीदृशम् ॥ १८ ॥
तथाप्यहिंसा न त्याज्या धर्मस्तत्र प्रतिष्ठितः ।
उपादिशति तानेवं ये ह्यस्य मतमानिनः ॥ १९ ॥
प्रतिकारो न हिंसाया हिंसया युज्यते त्विह ।
हिंसापराणां म्लेच्छानां प्रेम्णैव हृदयं जयेत् ॥ २० ॥
अक्रोधेन जयेत्क्रोधमिति धर्मानुशासनम् ।
तदेव पाल्यमस्माभिः प्रणीतमृषिभिः पुरा ॥ २१ ॥
महात्मनो वच इदं प्राकृतानां न तुष्टये ।
कृते प्रतिकृतं त्वेव तेषां बहुमतं तदा ॥ २२ ॥
तथापि लोकशान्त्यर्थं महात्मा यततेऽनिशम् ।
ग्रामाद् ग्रामं स गत्वैव लोकान्संबोधयत्यपि ॥ २३ ॥
शीखादयस्तु मुस्लीमैः पाकिस्तानान्निराकृताः ।
संतापितास्तदागच्छन्हिन्दभूमिं प्रयत्नतः ॥ २४ ॥
वदन्ति प्रकटं वध्या मुस्लीमा हिन्दवासिनः ।
हतास्तदीयैरास्मा नो हृतं सर्वस्वमेव च ॥ २५ ॥
वदन्मृदु महात्मा तु संसान्त्वयति तानपि ।
भवतां महती हानिरिति शोचामि वै भृशम् ॥ २६ ॥
अत्रत्यान्मुस्लिमान्हत्वा निष्कृतिर्नं भवेद्यतः ।
अतः शान्तिं समाश्रित्य युक्तं प्राप्तस्य सेवनम् ॥ २७ ॥

इत्येवमादिभिर्वाक्यैर्लोकेषु शममिच्छति ।
तन्मतेनैव वर्तन्ते हिन्दभूमेः प्रशासकाः ॥ २८ ॥
महान्तं यत्नमास्थाय मुस्लीमास्तैश्च रक्षिताः ।
तथा प्रशमिता देशे हिन्दुशीखादयो जनाः ॥ २९ ॥
तथापि पाकिस्तानीयाः सर्वदा कलहप्रियाः ।
यत्किंचित्कारणं कृत्वा विरोधाय सदोद्यताः ॥ ३० ॥
मिथ्याप्रलापैर्हिन्दूनां पीडायै च कृतोद्यमाः ।
महात्मापि न पर्याप्तो मुस्लीमानां प्रशान्तये ॥ ३१ ॥
तैः प्रेरिता वायवीयाः क्रूरा हूणाः सहस्रशः ।
काश्मीरदेशमाक्रम्य पीडयन्ति भृशं प्रजाः ॥ ३२ ॥
तत्र यद्यपि मुस्लीमबाहुल्यं शासको नृपः ।
हिन्दूरेवेत्यसंतुष्टास्तत्रत्या अपि केचन ॥ ३३ ॥
संगत्य तैश्च पाकीया हूणसाह्यमवाप्नुवन् ।
दाहयन्ति बहून्ग्रामान्घातयन्ति जनानपि ॥ ३४ ॥
मुस्लीमेष्वेव संघर्षस्तत्र तत्र महानभूत् ।
भीषितश्च तदा राजा साह्यार्थं प्रार्थयत्स्वकान् ॥ ३५ ॥
आगताः सैनिकाश्चापि हिन्दराष्ट्रात्सहस्रशः ।
काश्मीररक्षणार्थाय हूणनिःसारणाय च ॥ ३६ ॥
तथापि हूणान्पाकीया युद्धोपकरणादिभिः ।
साह्यं कुर्वान्ति तेनैते पराजेतुं सुदुःशकाः ॥ ३७ ॥
पाकिस्ताने समावेशः काश्मीरस्य सदोचितः ।
जिनादीनां मतं तेन संघर्षोऽयं महान्कृतः ॥ ३८ ॥
यत्र यत्र हि मुस्लीमा भवेयुस्तत्र तत्र च ।
पाकिस्तानस्य भागः स कार्यः सर्वप्रयत्नतः ॥ ३९ ॥
इत्येव नीतिमाश्रित्य भेदः सर्वत्र कारितः ।

मुस्लीमानां धुरीणैः स फलितो भारते यथा ॥ ४० ॥
तथा सौराष्ट्रदेशेऽपि जुनागडनृपः खलः ।
पाकीयैरेव संगत्य प्रजापीडार्थमुद्यतः ॥ ४१ ॥

हिन्दूनां तत्र बाहुल्यं तैर्विरोधः समाश्रितः ।
प्रजासंघर्षभीत्यैव नृपः पाकं पलायितः ॥ ४२ ॥
दक्षिणस्यामपि दिशि भागानगरपालकः ।
स्वयं मुस्लीमधर्मीयः स्वकीयानां हिते रतः ॥ ४३ ॥
दिल्लीश्वरेण यः प्रान्ते नियुक्तः सेवकः पुरा ।
स्वयमेवाभवद्राजा भागादेशं वशेऽकरोत् ॥ ४४ ॥

पश्चादांग्लैश्च संगत्य तेषां यत्संमतं प्रियम् ।
तदेव कुर्वन्ति सदा वंशजास्तस्य सांप्रतम् ॥ ४५ ॥
नष्टं दिल्लीपते राज्यं महाराष्ट्रं तथा गतम् ।
अयं तु वर्धते धूर्तः कालमानं विचार्य च ॥ ४६ ॥

प्रायः प्रजा हिन्दव एव तस्य
तथापि राज्ये बहवस्तदीयाः ।
महत्पदे शासनकार्ययुक्ताः
कुर्वन्ति पीडा विविधाः प्रजासु ॥ ४७ ॥

यदा च भारतं वर्षं खण्डितं तदनेकधा ।
आंग्लैस्तदैव सामन्ताः स्वतन्त्रा इति घोषितम् ॥ ४८ ॥
तथापि बहवो भूपाः स्वप्रजामतवर्तिनः ।
हिन्दाग्रणीभिः संमन्त्र्य सर्वेषां तोषमाप्नुवन् ॥ ४९ ॥

निर्माय संघान्केषांचिदन्ये लीना महत्तरे ।
राष्ट्रे तेन बलं तेजो वर्धते लोकसौख्यदम् ॥ ५० ॥
एकरूपाः प्रजाः सर्वा हिन्दराष्ट्रे समागताः ।
मन्त्रिणोऽपि सदा तासां सुखायासंश्च तत्पराः ॥ ५१ ॥

भागाराज्याधिपस्त्वत्र दीर्घं मन्त्रं स्वमन्त्रिभिः ।
कृत्वा हिन्देन प्राग्वच्च संबन्धं निश्चिकाय सः ॥ ५२ ॥
तत्रापि बहवः शंकाः प्रकल्प्य पुनरेव सः ।
स्वदूतान्प्रेषयत्येव वादार्थं हस्तिनापुरम् ॥ ५३ ॥
एवं कालापहरणं यावत्कुटिलकारितम् ।
तावत्प्रजापीडनाय तत्परा हस्तकाः सदा ॥ ५४ ॥
रझाकारा इति ख्याता हिन्दुनाशाय चोद्यताः ।
जीवितं धनमेतेषां स्त्रीपाविञ्यं हरन्ति ते ॥ ५५ ॥
तथा पाकप्रेरणया बलवृद्धिं चकार सः ।
युद्धोपकरणैः सर्वैः सिद्धां सेनां करोत्यसौ ॥ ५६ ॥
सर्वत्र भारते चारान्गूढं संप्रेष्य यत्नतः ।
उत्तेजयति मुस्लीमान्हिन्दराष्ट्रविनाशने ॥ ५७ ॥

धृतराष्ट्र उवाच ।

पाकीयानां दुष्कृतिभिर्यन्महात्मा न कोपितः ।
स्वकीयेष्वेव शान्त्यर्थं यतते तद्यथोचितम् ॥ ५८ ॥
सद्वृत्तिमेतां जानद्भिरांग्लैः पूर्वं सुतापितः ।
मुस्लीमानामेव राज्यं भारते कर्तुमुद्यतः ॥ ५९ ॥
स दृष्ट्वा बहुधा पीडामीदृशीं पाककारिताम् ।
ततः किमकरोत्तन्मे वद संजय पृच्छते ॥ ६० ॥

सजय उवाच ।

सौजन्यस्य परां कोटिं गतो लोकानुपादिशत् ।
स्वकीयानेव गान्धी तत्प्राकृतानां न संमतम् ॥ ६१ ॥
स्वेषां पाके कृता हानिस्तस्या इच्छन्ति निष्कृतिम् ।
अत्रत्यानां मुस्लिमानां पीडां कृत्वा कथंचन ॥ ६२ ॥
तेन व्याकुलितो गान्धी महात्मा स्वयमाचरत् ।

प्रायोपवेशनं स्वेषां शुध्यर्थं शान्तये तथा ॥ ६३ ॥
आदावेव स वार्धक्यात्क्षीणशक्तिर्विशेषतः ।
एतेन चलितुं स्थानान्न शक्नोति पदात्पदम् ॥ ६४ ॥
जीविते चास्य संजातः संशयो वै महांस्ततः ।
अस्येष्टमपि तत्कर्तुं नेतारः स्वयमुद्यताः ॥ ६५ ॥
पक्षपातो मुस्लिमेषु हिन्दुनाशाय सर्वथा ।
भवतीति मतं तत्र केषांचन विरोधिनाम् ॥ ६६ ॥
संतापिता ब्रुवन्त्येते गान्धी मुस्लीमपोषकः ।
तेषामेव प्रीतये सद्राष्ट्रमेतेन खण्डितम् ॥ ६७ ॥
तथापि नैव संतुष्टो मुस्लीमानां प्रियंकरः ।
सर्वस्यानर्थजातस्य कारणं चास्य तन्मतम् ॥ ६८ ॥
तेष्वेवासन्नुग्रतराः केचनैवाततायिनः ।
प्रार्थनावसरे क्षिप्तस्तत्रैकेनाग्निगोलकः ॥ ६९ ॥
सहसैव निरुद्धोऽपि शासकैर्दण्डधारिभिः ।
उत्पन्नः संशयश्चास्य जीविते तु महात्मनः ॥ ७० ॥
ततस्तद्रक्षणार्थाय नियोज्या दण्डधारिणः ।
इत्यपि स्वीकृतं नैव मतं स्वेषां महात्मना ॥ ७१ ॥
मदीयाः सर्व एवैते यद्यपि स्युर्विरोधकाः ।
न मे भीतिर्विचरतो वर्तते मनसि क्वचित् ॥ ७२ ॥
इति ब्रुवञ्जनान्सर्वांस्तत्र संमिलितांश्च सः ।
उपादिशत्युनुदिनं यद्राष्ट्रस्य हितावहम् ॥ ७३ ॥
तत्रैको जनसंमर्दे दुरात्मा घाततत्परः ।
आवर्तनलिकायन्त्रं गृहीत्वा संमुखोऽभवत् ॥ ७४ ॥
आक्षिप्य गुलिकाश्चास्य देहे जर्जरिते तदा ।
प्राणैर्व्ययोजयद्यावन्न ज्ञातं कैरपि क्वचित् ॥ ७५ ॥

क्षणादेवापतद् भूमौ ' हरे राम ! ' इति ब्रुवन् ।
समदृष्टिः प्रशान्तात्मा सर्वभूतहिते रतः ॥ ७६ ॥
हिन्दुमुस्लीमसंघर्षो राष्ट्रखण्डनजो महान् ।
अपराधिषु तत्रापि क्षमाशीलेन भावनम् ॥ ७७ ॥
इति यन्मतमस्यासीत्तन्नागृह्णंश्च पामराः ।
पापीयस्तत्र एवैतद्यन्महात्मैव घातितः ॥ ७८ ॥
कृतार्थाः कारिताश्चांग्ला यै राष्ट्रं खण्डितं किल ।
उत्तेजिताश्च मुस्लीमा अस्वास्थ्यं सर्वतोऽभवत् ॥ ७९ ॥
गतो गान्धी महात्मासौ गीताप्यत्र समाप्यते ।
हा धिक् ! स्वकीयैरेवेयं राष्ट्रहानिः कथं कृता ॥ ८० ॥
सत्यस्य माहात्म्यमहिंसकेषु
यावन्न संस्थापितमत्र पूर्णम् ।
गीतापि तावद्धितकारिणीयं
सर्वाप्रिया स्थास्यति भूतलेऽस्मिन् ॥ ८१ ॥
॥ इति श्रीगान्धीगीतायामापद्योगो नाम त्रयोविंशोऽध्यायः ॥ २३ ॥

अथ चतुर्विंशोऽध्यायः ।

धृतराष्ट्र उवाच ।
महात्मा निर्ममः सर्वाञ्शान्तिमेव समादिशत् ।
तस्येदं मरणं श्रुत्वा बहु शोचामि संजय ॥ १ ॥
ततः परं किमभवत्किमकुर्वंश्च मन्त्रिणः ।
आक्रान्तं हिन्दुराष्ट्रं वा मुस्लीमैस्तद्वदाधुना ॥ २ ॥
महात्मनो हि मरणे राष्ट्रे सर्वत्र विप्लवः ।
स मुस्लीमहितायैव भवेदिति सुनिश्चितम् ॥ ३ ॥

संजय उवाच ।

काश्मीरेषु महद्युद्धमादावेव प्रवर्तितम् ।
पाकीयैर्देश आक्रान्तः प्रजाश्च बहु पीडिताः ॥ ४ ॥
मुस्लीमा अपि तत्रत्या हताः पाकीयबान्धवैः ।
काश्मीररक्षणं युद्धे कुर्वते हिन्दुसैनिकाः ॥ ५ ॥
[६३]पाश्चात्यराष्ट्रसंघोऽपि न्यायान्यायविवेचकः ।
ज्ञापितः सर्वमेवेदं वृत्तं हानिकरं महत् ॥ ६ ॥
तत्रत्यैः प्रमुखैः सम्यगाहूयोभयपक्षिणः ।
श्रुतं विस्तरतश्चापि काश्मीररणकारणम् ॥ ७ ॥
[६४]प्रत्यक्षं स्वयमागत्य दृष्टा चापि रणस्थितिः ।
युद्धाद्विरम्यतां सर्वैरित्यादिष्टं समञ्जसम् ॥ ८ ॥
तथापि नैव पाकीयाः शृण्वन्ति वचनं हितम् ।
यत्किंचित्कारणं कृत्वा युद्धायैव समुद्यताः ॥ ९ ॥
तथा सुव्यापृतान्दृष्ट्वा हिन्दराष्ट्रप्रशासकान् ।
गान्धीवधेनाधिकं च सर्वथैव समाकुलान् ॥ १० ॥
मानी दृप्तः स्वतन्त्रोऽहमिति भागाधिपो ब्रुवन् ।
निजामोऽप्यधिकां पीडां स्वप्रजाभ्यो ददाति ह ॥ ११ ॥
लोकच्छन्दानुसारेण भाव्यं वै राज्यशासनम् ।
इति ब्रुवाणा नेतारः[६५] कारागारेषु पातिताः ॥ १२ ॥
हिन्दूनां सर्वथा घातं कर्तुमन्ये समुत्सुकाः ।
स्वैरं शस्त्राणि संगृह्य मुस्लीमा विचरन्त्युत ॥ १३ ॥
यन्निर्दयैः कृतं वङ्गे पञ्जाबेऽन्यत्र कुत्रचित् ।
तदेव प्रकटं राज्ये क्रियतेऽप्यविरोधितम् ॥ १४ ॥
भ्रष्टाः स्त्रियो हृता संपज्जीवनं कष्टमेव तत् ।
केचनैव कथंचिच्च हिन्ददेशं समागताः ॥ १५ ॥

मन्त्रिणश्च सुसंमूढा मरणेन महात्मनः ।
त्राणार्थं प्रार्थिताश्चैतैर्निवेद्य नृपकारितम् ॥ १६ ॥
तथापि कलहो मा भून्मुस्लीमैरिति चिन्तया ।
क्षान्तं तैस्तद्यथापूर्वं निजामकृतपातकम् ॥ १७ ॥
स्वकीयानां तु रक्षार्थं गूढं चाराः प्रवर्तिताः ।
प्रान्ते प्रान्ते च सर्वत्र दण्डिनो दुष्टशासकाः ॥ १८ ॥
भागापरिसरे चापि नियुक्ताः सैनिकास्तथा ।
स्वप्रजारक्षणार्थाय सज्जाः सर्वत्र शस्त्रिणः ॥ १९ ॥
निजामोऽपि स्वयं दूतान्प्रेष्यासौ हस्तिनापुरम् ।
यावत्प्रकुरुते यत्नं बाह्यतो दीर्घकालिकम् ॥ २० ॥
तावदेव परेभ्योऽपि युद्धोपकरणानि सः ।
क्रीणाति गूढं दत्वैव धनं राष्ट्रजिगीषया ॥ २१ ॥
एवं संगत्य पाकीयैः पीडार्थं हिन्दवासिनाम् ।
सदैव यतते चासौ तेन शान्तिर्न कस्यचित् ॥ २२ ॥
महाराष्ट्रेऽपि च महाननर्थः समजायत ।
गान्धिनो मरणं यत्र निमित्तं तत्कृतं जनैः ॥ २३ ॥
ग्रामे ग्रामे वसन्ति स्म ब्राह्मणा व्यवसायिनः ।
तेषां गृहाणि दग्धानि सर्वस्वं नाशितं तथा ॥ २४ ॥
असहायाश्च ते सर्वे कारिता ब्राह्मणेतरैः ।
मत्सरग्रस्तहृदयैर्ग्रामीणैरेव बान्धवैः ॥ २५ ॥
राष्ट्रनेतृषु संवादः संभेदश्चाप्यजायत ।
तथा जनेषु संघर्षः कारितो रूसवादिभिः ॥ २६ ॥
महार्घतापि वस्तूनामादौ युद्धनिमित्तजा ।
दिने दिने वर्धते सा जीवने दैन्यकारिणि ॥ २७ ॥
केवलं वणिजो लोके विपुलं धनमाप्नुवन् ।

न्यायान्यायमपश्यन्तः केवलं स्वहिते रताः ॥ २८ ॥
नेहरूवल्लभादीनां खेरादीनां तथैव च ।
मन्त्रिणां महती चिन्ता कथं लोकः सुखी भवेत् ॥ २९ ॥
' अजातशत्रु'रित्यस्य बालगंगाधरस्य यत् ।
प्रथितं नाम तच्चाभूदन्वर्थकमपि प्रियम् ॥ ३० ॥
मोहमय्यां नियुक्तोऽसौ प्रधानामात्यपीठभाक् ।
यतते शान्तिसौख्यार्थं प्रजानां सततं सुधीः ॥ ३१ ॥
यद्राष्ट्रखण्डनं कृत्वा प्राप्तं स्वातन्त्र्यमीदृशम् ।
प्रथमे वत्सरे तत्राप्येवमापत्परंपरा ॥ ३२ ॥
पाश्चात्यानां भेदनीतिः सर्वत्रानर्थकारिणी ।
तस्या एव प्रभावेन प्राच्यां लोका वशीकृताः ॥ ३३ ॥
अत्रापि भारते वर्षे तस्या एव फलं त्विदम् ।
मुस्लीमान्कारणं कृत्वा हिन्दवो यत्र घातिताः ॥ ३४ ॥
उभयोरैक्यसिद्ध्यर्थमवतारो महात्मनः ।
मरणेन तु तस्याद्य राष्ट्रं व्याकुलितं बहु ॥ ३५ ॥
तथापि मन्त्रिणो धीरा नियुक्ता राष्ट्रपालने ।
स्वयं धैर्यं समालम्ब्य लोकान्सत्पथमादिशन् ॥ ३६ ॥
समञ्जसैर्विचारैश्च प्रेरिता हितकारिणः ।
अपसार्यापदः सर्वा महान्तस्तेजसा युताः ॥ ३७ ॥
काश्मीरे यच्च पाकीयैर्घोरं युद्धं प्रवर्तितम् ।
तत्र प्रजासाह्यकारी मुख्यमन्त्री नियोजितः ॥ ३८ ॥
हिन्दसेनास्तथा शूराः पराक्रम्य यथातथम् ।
निराकुर्वन्ति ताः शत्रून्दूरं पापाः पलायिताः ॥ ३९ ॥
निजामोऽपि यदा नैव हितबुद्धिं समाशृणोत् ।
यदा च तत्प्रजाः सर्वास्तेन व्याकुलिता भृशम् ॥ ४० ॥

तदासावपि दण्डार्हः कृतो वै हिन्दमन्त्रिभिः ।
ज्ञापितश्च सभास्वेवं भाषणैर्विविधैस्तथा ॥ ४१ ॥
तदा तस्यानुकूल्याय पाकीयैरपि घोषितम् ।
स्वल्पापि पीडा चैतस्य देशेऽनर्थाञ्जनिष्यति ॥ ४२ ॥
मुस्लीमाः सर्वतो राष्ट्रे तेन संतापिता भृशम् ।
कोलाहलं प्रकुर्वाणा हन्युर्हिन्दून्सहस्रशः ॥ ४३ ॥
तस्मात्स्वातन्त्र्यमस्यैव मन्तव्यं सर्वथा जनैः ।
यदस्य संमतं राज्ये तत्स्वीकार्यं सुखेन च ॥ ४४ ॥
आंग्ला अपि निजामेन धनं दत्वा वशीकृताः ।
अस्यानुकूलं जल्पन्ति दूषयन्ति च मन्त्रिणः ॥ ४५ ॥
अन्यायोऽयं महांल्लोके यन्निजामः स्वतन्त्रितः ।
पदे पदे पीड्यतेऽसौ शासने हिन्दमन्त्रिभिः ॥ ४६ ॥
उदारोऽयं सदाचारश्चास्माकं हितकृत्सुहृत् ।
रक्षितव्यः सदास्माभिरापत्सु च सभासु च ॥ ४७ ॥
उत्तेजितोऽधिकं चैतैर्जल्पनैरसकृत्तदा ।
निजामो न शृणोत्येषां हितवादांश्च मन्त्रिणाम् ॥ ४८ ॥
तदा सपदि तस्यापि दुष्कृतं तन्निरोधितम् ।
प्रेषिताः सर्वतो सेनाः प्रजानां शान्तिहेतवे ॥ ४९ ॥
ताभिर्निर्दालिता दुष्टा निजामोऽपि वशीकृतः ।
लोकानां सुखशान्त्यर्थं स्थापितं शासनं दृढम् ॥ ५० ॥
सामाद्येवं समाश्रित्य दण्डं चापि यथोचितम् ।
जवाहरपटेलादिमन्त्रिणो जयमाप्नुवन् ॥ ५१ ॥
यथाकाशस्थितः सूर्यो मेघैराच्छद्यतेऽसितैः ।
तमोव्याप्तश्च लोकोऽयं तेन व्याकुलितो भवेत् ॥ ५२ ॥
पश्चाद्वायुर्जवेनैतान्मेघानुद्धूय सर्वतः ।

सूर्यप्रकाशे सर्वांश्च सुखितान्संकरोति ह ॥ ५३ ॥
आवृतं सत्यमप्येवमनृतेनेह यत्क्षणम् ।
स्वतेजसा तल्लोकांस्त्रीन्द्योतयेदचिरात्सदा ॥ ५४ ॥
माहात्म्यं हिन्दराष्ट्रस्याप्येवं सत्ये प्रतिष्ठितम् ।
वर्धतेऽनुदिनं तेजोबलयुक्तं सुनिश्चितम् ॥ ५५ ॥

धृतराष्ट्र उवाच ।

गतो यद्यप्यसौ गान्धी तथापि तमनुव्रताः ।
जवाहरादिनेतार उदारा धैर्यशालिनः ॥ ५६ ॥
तमनुस्मृत्य वर्तन्ते लोकानां हितकाम्यया ।
इति श्रुत्वाद्य संतोषो महान्मनसि जायते ॥ ५७ ॥

संजय उवाच ।

आंग्लानामेव साम्राज्यं भारते संस्थितं चिरात् ।
तत्त्वाभीप्सितं राजंस्त्वदीयैर्यातितं तथा ॥ ५८ ॥
तथापि कालमाहात्म्याद्यत्नैरपि महात्मनाम् ।
स्वातन्त्र्यं भारते प्राप्तं खण्डान्कृत्वाप्यनेकशः ॥ ५९ ॥
पाकिस्तानस्य निर्माणे नानाक्लेशपरंपरा ।
त्वदीयैरेव सर्वं तत्कृतं नास्त्यत्र संशयः ॥ ६० ॥
अधुनापि वदन्त्येते साम्राज्यकृतनिश्चयाः ।
भारतेऽप्यांग्लमाहात्म्यं त्वदीयाश्चर्चिलादयः ॥ ६१ ॥
अटलीसदृशास्त्वेतेऽप्युदारा अधिकारिणः ।
भारतस्य हिते युक्तास्तवेच्छा तैर्निराकृता ॥ ६२ ॥
अन्यत्रापि च राष्ट्रेषु लोकः स्वातन्त्र्यमिच्छति ।
जातस्तत्र च संघर्षः परकीयैः [९७]प्रशासकैः ॥ ६३ ॥
पाकिस्तानप्रणेतापि जिना कालवशं गतः ।
हिन्दूनां पीडनायैव तदीयास्तु सदोद्यताः ॥ ६४ ॥

निःसार्यन्ते बलात्सर्वे हिन्दवस्त्राणमीप्सवः ।
हिन्दभूमिमाश्रयन्ति पाकीयानां हिताय तत् ॥ ६५ ॥
तथापि हिन्ददेशेऽत्र नेतारः साम्यवादिनः ।
महात्मनो वचः स्मृत्वा यतन्ते न्यायतः सदा ॥ ६६ ॥
मुस्लीमोऽयमयं हिन्दुर्ब्राह्मणोऽप्यथवा कृषी ।
इति जातीयभेदोऽयं प्रभवेद्राष्ट्रघातकः ॥ ६७ ॥
तस्माज्जातीयतावादं निराकर्तुं समूलतः ।
यतन्ते राष्ट्रनेतारः सर्वलोकहिताय च ॥ ६८ ॥
एतेऽपि स्युर्यथाकालं लोकैरनुसृता नृप ।
उभयोरिह चैकात्म्ये कार्यसिद्धिः स्थिता ध्रुवा ॥ ६९ ॥
यत्र लोकाग्रणीर्धीरो लोकोऽपि त्यागशीलवान् ।
तत्र श्रीर्विजयोभूतिर्भवेद्राष्ट्रं समुन्नतम् ॥ ७० ॥
॥ इति श्रीगान्धीगीतायां सर्वमङ्गलयोगो नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

॥ समाप्तेयं गान्धीगीता ॥

शुद्धिपत्रम् ।

पृष्ठं	श्लोकः	अशुद्धम्	शुद्धम्
३	६ (उ.)	' वैदभीर्याः '	' वैदर्भीयाः '
४	१० (पू.)	' °मुदिश्य '	' °मुद्दिश्य '
५	२६ (उ.)	' खिस्तीया '	' ख्रिस्तीया '
६	४० (पू.)	' °रौषधीनां '	' °रोषधीनां '
,,	४५ (उ.)	' °तप्तराः '	' °तत्पराः '
८	३ (उ.)	' °दौबल्यं '	' °दौर्बल्यं '
११	३६ (पू.)	' °तनः अद्य '	' °तनश्चाद्य '
१३	१६ (पू.)	' राष्ट्रीयाः '	' राष्ट्र्याः '
१६	५६ (पू.)	' खिस्ताश्च '	' ख्रिस्ताश्च '
१७	३ (पू.)	' सप्तथं '	' सत्पथं '
,,	७ (उ.)	' न्यस्थे° '	' न्यस्ये° '
,,	८ (पू.)	' राष्ट्रीया '	' राष्ट्र्या '
१८	१३ (पू.)	' दयालतः '	' दयालवः '
,,	१९ (पू.)	' अनाश्चित्य '	' अनाश्रित्य '
२०	२ (पू.)	' सशस्त्र° '	' सशस्त्रा° '
,,	४ (उ.)	' आहिताय '	' अहिताय '
२२	८ (पू.)	' एवमेवं '	' एवमेतं '
२४	६ (पू.)	' येव '	' येन '
२६	३७ (पू.)	' एवे '	' एवं '
३२	१७ (पू.)	' वैयर्थ्य '	' वैयर्थ्यं '
३६	४० (उ.)	' हितं '	' हि तं '

३७	४३ (उ.)	' राष्ट्रीय '	' राष्ट्रिय '
३९	१३ (पू.)	' नियुक्तासु '	' नियुक्तास्तु '
४०	२७ (पू.)	' सन्यस्त° '	' संन्यस्त° '
४२	५६ (पू.)	' °ष्कारं व्रतं '	' °ष्कारव्रतं'
४३	६३ (उ.)	' °दाग्ला° '	' °दांग्ला ° '
,,	६७ (पू.)	' व्यापृतो जनः'	'व्यापृता जनाः '
४६	८ (उ.)	' °श्वर भाव°	' °श्वरभाव°
,,	,, ,,	' °स्ति केषु '	°स्तिकेषु
५०	२ (उ.)	' उपकृताः '	' उपकृता '
५३	४० (पू.)	' अदासी कर्तुम् '	' अदासीकर्तुम् '
,,	,, ,,	' रज्जन '	' रञ्जन '
६९	४५ (पू.)	' व विभो '	' वै विभो '
७१	६९ (पू.)	' संत्रोद्य– '	' संचोद्य– '
७२	३ (पू.)	' समुदिश्य '	' समुद्दिश्य '
७३	१३ (पू.)	' सर्वेऽऽप्येते '	' सर्वेऽप्येते '
७४	२९ (उ.)	' °व भूमा° '	' °वन्भूमा° '
८०	१८ (उ.)	' पराभवः '	' पराभवाः '
८८	३३ (उ.)	' हिन्दू° '	' हिन्दु° '
९०	५३ (पू.)	' बहवः शंकाः '	' बह्वीः शंकाश्च '
९२	७८ (उ.)	' एवैत° '	' चैवैत° '

Notes.

1 This ध्यान serves also as a short introduction to the main work.

2 The Kaurava King of the original Bhagavadgita is taken here as a representative symbol of British Imperialism; while Sanjaya is the king's chairoteer and adviser.

3 The Viceroy and Governor General of India.

4 Session of the Indian National Congress at Lahore, Punjab; Pandit Jawaharlal Nehru being President in 1929, when a Resolution was passed declaring complete independence as the goal of India.

5 The famous Dandi March of 1930, led by Mahatma Gandhi; preparation ot salt was also taken up as a movement in various other places.

6 " Divide and Rule " policy, so successfully followed by all politicians.

7 Invasion of Alexandar the Great, from North-West of India.

8 °फले असक्तः " Not attached to the results of his actions. "

9 एतं stands for सत्त्व, which is not intimidated by any torture, not even by death.

10 " Union is strength ".

11 Everything is done by the representatives of the people, but solely in the name of the king who individually is powerless in the actual administration

or direction of the subjects of national interest.

12 The machinery of rule in India, as developed by the English, left no scope for any individual bias.

13 Non-cooperation with Government, and bycott of English services by all Indians.

14 Bycott of English goods.

15 The incident is given in the Vanaparvan of the Great Indian Epic, The Mahabharata: Pandavas bereft of their royal power, were living in exile in forest; where the Kaurava prince, having gone in the forest, under the pretext of inspecting the cowsheds, but wishing to humiliate the Pandavas, was attacked by the Gandharvas and made captive. When the exiled brothers heard this, they released him from captivity, showing thereby, that in times of difficulty they were one.

16 Eldest Pandava brother, Dharmaraja.

17 Legislative Assemblies were established in different provinces, where the socalled representatives of the people, sat and passed resolutions; but the Governor had supreme powers, and these resolutions were often of no practical use.

18 Lord Curzon, Viceroy and Governor General of India, was the first to bring about the partition of Bengal, which caused great commotion in the country.

19 Queen Victoria's proclamation, when the ruling powers of India, were taken over from the East India Company.

20 The socalled Anarchists of Bengal.

21 Session of the Indian National Congress, at Calcutta, where under the presidentship of Dadabhoy Nowroji, a resolution was passed, declaring " Swarajya "–Homerule-- as the goal of the National movement, accepting bycott of foreign goods, as one of the means to that end.

22 These were the Liberals, who stood for cooperation with Government, relying upon the good will of the English.

23 The Responsivists, who, while cooperating with the Government, where the good of the country could be achieved thereby, showed readiness to oppose the Government, where necessary from viewpoint of National good.

24 These relied upon their own efforts; and subsequently developed into non-cooperators.

25 Killing of the thousands of innocent Indians in Julianwalla, Punjab; where the people were called to attend a meeting, and shot down by English soldiers under Dyar.

26 Rabindranath Tagore of Bengal, who won world-wide fame as poet.

27 Jagadishchandra Bose, the famous scientist of India.

28 Even those, who, with good motives, worked, but failed, deserve praise. " Not failure, but low aim is crime, "

29 Lala Lajpat Rai, Lion of Punjab.

30 Pandit Madan Mohan Malaviya of United Provinces.

31 Father and son, Pandit Motilal and Javaharlal Nehru, of whom the son, leads the destinies of the Nation, at present.

32 Swami Sraddhanand, who was shot dead by a Muslim fanatic, in Delhi.

33 Surendranath Banerji, called the " uncrowned ruler of Bengal. "

34 Babu Motilal Ghose, of the Amrit Bazar Patrika, Calcutta.

35 Barrister C. R. Das.

36 Subhashchandra Bose, and Sen Gupta.

37 Yogi Shri Aravind, now at Pondicherry.

38 From the Late Sir Vijaya Raghavacharya down to C. Rajagopalachariar, the present Governor General of India. There are, of course, many patriots other than the Acharyas of the South; the present is only an indication.

39 Lokamanya Bal Gangadhar Tilak.

40 The Hon. Mr. Gopal Krishna Gokhale, founder of the Servants of India Society.

41 The Rt Hon. V. S. Shrinivas Shastri, president of the above S. I. Society.

42 For some time, the trinity consisting of (1) Lal (Lajpatrai), (2) Bal (Lokamanya Tilak) and (3) Pal (Bipinchandra), led the Indian Nation.

43 Round Table Conference, held in England in 1931, where Indian leaders of different political parties were invited to discuss the new constitution of the socalled "Svaraj." No agreement could be arrived at after long and numerous meetings, and, at last, " Communal Award " was graciously granted to the Indian Nation, by Mr. Macdonald's Government, in 1932.

44 Mahatma's fast, which brought about the Poona Pact, by which the depressed classes joined hands with the National Congress, on 26th September 1932.

45 Congress Session which met at Allahabad.

46 The Muslim League, which functioned all over India, in the exclusive interests of the Muslims. It never acknowledged Congress as the representative of the whole of India and in spite of Mahatma Gandhi's efforts, always stood for opposing the proposals for a united India.

47 The constitution of 1935, which provided for weightage to minorities, i. e. the Muslims, so that where they were in a majority they could easily capture the Government of the Provinces, while in others, where they were in minority, special additional seats were given to them, the result being that muslims became powerful in all the provinces of India.

48 The second world war, which subsequently engaged almost all the Nations of the world.

49 Sanskritised form for " Germans "

50 " Russia " in friendship with the Germans, attacked Poland, and divided the subjugated nation among themselves. This served as the cause for the English to declare war against Germany.

51 Congress ministries resigned in a body, as a protest against the Viceroy's declaration of war, without consulting them.

52 Sir Stafford Cripps was deputed to India, in March 1942, to discuss the situation with Indian leaders. Britain's offer was more in terms of the future than of the present. Gandhiji called it a 'Post-dated cheque' and Cripps had to return without securing cooperation of India's leaders.

53 " Quit India " movement started by Gandhiji; he declared 'Let the British leave India, they need not worry about the disturbances in the country.'

54 A mass meeting was held in Bombay on the night of 8th August 1942, where Gandhiji proclaimed his formula " do or die, " and immediately, leaders all over India, were arrested; this was followed by a terrific suppression by the Government.

55 While kept under arrest in Agakhan palace, near Poona, Gandhiji suffered a terrible loss; the death of his wife, Kasturba.

56 The ' Atom bomb ' which brought the war to a deplorable end.

57 ' Āmraka ' a sanskritised form for Americans,

58 ' Direct action ' of the Muslims, which started with killing of Hindus in Bengal, and the trouble took a serious form in other places, also.

59 Lord Wavell was called back after these disterbances, and Mount Batton appointed Viceroy and Governor General of India.

60 The Nehru report, to which all Indian leaders including Jinah, had agreed.

61 Pathans of the North-west Frontier attacked Kashmir, and were instigated and aided by the leaders of Pakistan.

62 The Nizam of Hyderabad, in the Deccan.

63 The United Nations Organization, having its offices at Lake Success, in America, was approached on this point; the Pakistan representatives, having now admitted their share in Kashmir aggression, the matter is still undecided, though an Armistice has recently been declared.

64 UNO Commission visited India to see the actual state of things and discuss the desirability of a compromise.

65 Leading members of the State Congress.

66 Communists taking their inspiration from Russia.

67 Struggle for independence in Indonesia, Indochina etc.

68 Making it impossible for the Hindus to stay in Eastern Pakistan, the recent shifting of lacs of

Hindus to West Bengal, has added to the difficulties of the Indian Government.

69 Being originally intended to be an imitation of the Bhagavadgita, this Gita also closed with 18th Adhyaya; but the manuscript lay with the author, for so many years, without its having any body to publish it. So that when, sometime back, the Hon. Shri Mavalankar read the manuscript, he suggested that the text be brought upto-date, including all the important developments in the National struggle for independence; and the author readily accepted the kind suggestion, adding six more Adhyayas. Thus bringing the total to 24.

No.	Title	Rs.	As.
1	वैजयन्तिकोश– G. Oppert		
2	Democratic Hinduism	2–	8
3	अमरकोश क्षीरस्वामीटीकायुत with marginal English mean – ings, Indexes etc- डॉ. शर्मा & N. G. सरदेसाई	7-	8
4	शाश्वतकोश:– N. N. कुलकर्णी	2-	8
5	शब्दरूपावलि:	0-	6
6	Systemes of Sk-Grammar		
7	Sk-Inscriptions- डिस्कळकर		
8	बाणभट्टविरचिता कादम्बरीमूल- मात्र ed. P. L. वैद्य accg. to Peterson's pagination –कथामुखं only, with Notes, Tr.	6– 3–	4 12
9	काव्यप्रकाश X—डॉ. शर्मा.		
50	भामिनीविलास– H. D, शर्मा	2-	8
51	काव्यप्रकाश III उल्लास ,,	0-	12
52	जातकसंग्रह– N. V. तुंगार	1-	4
53	Ancient Karnataka by Dr.- Saletore (Tuluvās.)	11-	4
54	भासनाटकचक्रं मूलमात्रं Texts of 13 भा I's Plays—C. R. देवधर	15-	0
55	पाली सद्दरूपावली	0-	4
56	Picturesque Orientālia by Dr. R. N. Sardesai. Album of 103 Photos of Western Indologists.	11-	4
57	काव्यप्रकाश I&II –डॉ. शर्मा	1-	12
58	न्यायसूत्र (गौतम) वात्स्यायन- भाष्य खद्योतटीका-डॉ. G. झा.	6-	4
59	—Full Eng. Trsns- ,, ,,	10-	0
60	कवींद्रचंद्रोदय–डॉ. शर्मा	2-	8
61	प्रतिज्ञायौगंधरायण–देवधर	1-	12
62	न्यायसूत्रपाठः	0-	8

No.	Title	Rs.	As.
63	गंगालहरी सार्थ (मराठी)	1-	0
64	Brahmanical Asceticism (संन्यास) Thesis- डॉ. शर्मा	2-	8
65	चारुदत्त– C. R. देवधर	2-	8
66	गंगालहरी समश्लोकी	0-	4
67	--मूलमात्रं	0-	2
68	महिम्नस्तोत्र सार्थ (मराठी)	1-	0
69	--मूलमात्रम्	0-	2
70	ब्रह्मसूत्रचतुःसूत्रि–डॉ. शर्मा	2-	8
71	चाणक्यनीतिसार–सार्थ	0-	8
72	ऊरुभङ्गम्–C. R. देवधर	1-	4
73	पाली धातुरूपावलि –तुंगार	0-	8
74	Ancient India & S. I. Hist. & culture —Dr. S. K. अय्यंगार 2 Vols.	22-	8
75	Fertschrift (Commn–vol) Prof- P, V काणे	17-	8
76	Hist of Guptas- डॉ. R. N. दांडेकर	5-	8
77	अलंकाररत्नाकर C. R. देवधर	3-	8
78	छांदोग्योपनिषद् Eng. Tr. of Text & शांकरभाष्य by. G. झा.	7-	8
79	मराठी गाइड to Pali Manual	1-	0
80	गुजराति— ——	1-	0
81	हिंदि ———	1-	0
82	इंग्लिश———	1-	0
83	ऋजुलध्वी–मालतीमाधवकथा	2-	8
84	मयूरसंदेश– डॉ. C. K. राजा	3-	8
85	संबंध निर्णय of गोपालन्याय– पञ्चानन	1-	4
86	बिल्हण's चौरपञ्चाशिकां–ताड- पत्रीकर	2-	8
87	उवासगदसाओ–प्रो. N. A. गोरे		
88	गान्धीगीता–ताडपत्रीकर	3-	12

Some Noteworthy Books.

1 History of classical Sanskrit Literature by Dr.M. Krishnamachariar. Demy pp. 1300 Rs.15.

2 भगवद्गीता काश्मीरपाठानुसारिणी ed-S. N. ताडपत्रिकर Rs. 3.

3 गीर्वाण ज्ञानेश्वरी Being the Sanskrit rendering in verses, of Sri Jnanesvara's famous Comm. on Bhagaved Gita. Part I. 1-6 chapters Rs. 3.
Part II. 7-12 chapters. Rs. 2

4 कोशावतंसः (काव्यमयकोश) of राघव कवि ed. खांडेकर Rs.2.

5 Ancient Rajputs. by C. V. Vaidya. Rs. 8-8

6 Catalogue of Indological Books (C. I. B. No.3) published in Jan. 1947. Demi pp - 212. Rs. 2.
Supplementary to Catalogue No. 2 published in May 1930. Demy pp. 333, priced at Rs. 3.

× × ×

The Poona Orientalist.

(*Journal devoted to Oriental Studies, started since 1936. Annl-Subsern-Rs. 6, in India. Sh. 10/6 or 3-outside India*)

Besides research articles, each issue contains *a select Bibliography of latest Indological publications.*

ORIENTAL BOOK AGENCY, 15, Shukrawar, Poona 2.